नं० ४३६० - घ

माधवीय जैमिनीय न्यायमाला विस्तर द्वितीया ध्यायः

नं० ४३६० - घ

पत्राणि ४१

4360

F. = 41

न्याय मीमांसा

अधि.

श्रीगणेशायनमः॥ प्रमाणमुपजीव्यत्वात्प्रथमेध्याय ईरितं॥ मानाधीनस्यधर्मस्यद्वितीये
भेदउच्यते॥१॥ अनेनप्रथमद्वितीययोरध्याययोः पूर्वोत्तरभावउपपादितः॥ द्वितीयाध्यायस्यप्र
थमेपादेप्रथमाधिकरणेप्रथमवर्णकमारचयति॥ विधिवाक्यपदैःसर्वैरपूर्वंप्रतिपाद्यते।प्र
त्येकमथवैकेनसर्वैस्तत्प्रतिपादनं॥ फलान्वयित्वात्सर्वेषांप्रधानान्वयलाभतः॥ लाघवादेक
बोध्यत्वंन[illegible]स्तुपरांतरं॥ विधिवाक्यमदृष्टार्थमखिलमत्रोदाहरणं॥ विधिवाक्येयावंतिपदा
[illegible]निसंतितानिसर्वाणिक्रियाकारकसंबंधमनादृत्यप्रत्येकमपूर्वस्यप्रतिपादकानि।कुतः
अपूर्वस्यफलत्वेनसर्वेषांपदानांफलान्वयित्वात्।अपूर्वप्रतिपादनाभावेपिक्रियाकारकयोः
परस्परान्वयोस्त्येवेतिचेत्सत्यं।तथापिप्रधानान्वयोलभ्यतेफलंहिप्रधानंपुरुषार्थतया
साध्यमानत्वादितिप्राप्तेब्रूमः।अपूर्वस्यात्यंतमदृष्टत्वादेककल्पनयैववाक्यस्योपपत्तौव

राम

नेककल्पनेगौरवंस्यात् तस्मादेकमपूर्वमेकेनशब्देनप्रतिपाद्यतेपदांतरंतुतच्छेषतयान्वेति॥
ननुयस्यपदस्यार्थोऽपूर्वस्यकल्पकस्तत्पदार्थस्यफलसाधनतयाफलंप्रत्युपादेयत्वविधेय
त्वगुणत्वाम्यभ्युपगंतव्यानितथातस्यैवशेषभूतपदार्थांतरंप्रत्युद्देश्यत्वानुवाद्यत्वप्रधान
त्वानामपिप्राप्तत्वाद्विरुद्धत्रिकद्वयापत्तिरितिचेत्मैवं॥उद्भिदायजेतपशुकामः।श्येनेना
भिचरन्यजेतेत्यादावुद्भिदादिशब्दानांनामत्वेनान्वयेसतियागसाधनवाचित्वाभावेनय
जतावुद्देश्यत्वादित्रिकापादकत्वाभावात्।तस्मादेकमेवपदमपूर्वप्रतिपादकं।नचध
र्मभेदप्रविंतांप्रस्तुतांपरित्यज्यकिमित्यपूर्वंचिंत्यतइतिवाच्यं।अपूर्वस्यैवधर्मत्वात्।द्वि
तीयवर्णकमारचयति॥द्रव्यादिशब्दतोऽपूर्वधीर्भावार्थपदात्तुत॥द्रव्यादीनांफलार्थत्वा
त्तच्छब्देनह्यपूर्वधीः॥क्रियाद्वारमतेद्रव्यंफलेननहियुज्यते।भावनावाचिनोपूर्वमाख्या

आधि:

तादवगम्यते॥ [struck out] धात्वर्थव्यतिरेकेण भावनानेति चेन्न तत्तत्सर्वधात्वर्थसंबद्धः करोत्यर्थो हि भा
वना। धात्वर्थः करणं तस्यां समानपदवर्णितः। इत्याद्युपकृति दृष्टा धात्वर्थोत्पादनात्मिका
इदमाम्नायते। सोमेन यजेत हिरण्यमात्रेयाय ददाति तस्मात्सुवर्णं हिरण्यं भार्यं श्येनेना
भिचरन्यजेत चित्रया यजेत पशुकाम इत्यादि॥ तत्र सोमहिरण्यशब्दौ द्रव्यवाचिनौ सु
वर्णशब्दो गुणवाची श्येनचित्राशब्दौ कर्मवाचिनौ तेनैतेन इत्यादिशब्देरपूर्वं प्रत्येति। कुतः। द्र
व्यादीनां सिद्धरूपाणां साध्यफलं प्रति साधनत्वसंभवात् यागदानादिरूपस्तु भावार्थः स्वय
मपि फलवत्साध्यरूपत्वान्न साधनं भवितुमर्हति ततो द्रव्यादीनां मोदनसाधनकरणत्वाद्
इत्यादिशब्दा अपूर्वं प्रत्यायका इति प्राप्ते ब्रूमः। क्रियां विना द्रव्याणि फलं साधयितुं न क्षमं
ते। पचिक्रियामन्तरेण काष्ठस्थाल्यादीनामोदनसाधकत्वादर्शनात्। अतो भावनाधात्वि

2

राम
२

नायजतिदृशातीत्याख्यातेमापूर्वंप्रतीयते। ननुधात्वर्थ[illegible]एवभावनातदन्याचानताचद्धात्वर्थस्तस्य
तांप्रतिकरणत्वोक्तेः। नद्वितीयः धात्वर्थव्यतिरिक्तायाः क्रियायादुर्लक्ष्यत्वादितिचेन्नैवं। सर्व
धात्वर्थसंबद्धरूपेणलक्षयितुंशक्यत्वात्तदुक्तमाचार्यैः। धात्वर्थव्यतिरेकेणयद्यप्येषानलक्ष्य
तेतथापिसर्वसामान्यरूपेणैवावगम्यतेइति। अन्यैरप्युक्तं। सिद्धसाध्यस्वभावाभ्यांधात्वर्थो
द्विविधस्तयोः। अन्योत्पादानुकूलात्माभावनासाध्यरूपिणीति। पचतीत्युक्तेपाकंकरोतीत्येत
मर्थंसर्वेजनाः प्रतियंतितत्रपाकः पक्तिः पचनमित्येतैःशब्दैर्व्यवह्रियमाणोलिंगकारकसं
ख्याद्युपेतोधात्वर्थः सिद्धस्वभावः करोतीत्यनेनव्यवह्रियमाणोलिंगाद्यपेतः साध्यस्वभाव
स्तत्रसिद्धस्वभावद्योतनायपथाघञ्प्रत्ययादयोविहिताः। तथासाध्यस्वभावद्योतनायाख्या
तप्रत्ययविधिः। सचाख्यातप्रत्ययार्थः ओदनोत्पत्तेरनुकूलस्ततोभवितुरोदनस्यप्रयोजक

अधि.

चेतनाचेतन

3

व्यापारत्वात्सिजं तेन भावनाशब्देनोच्यत इत्यन्ये भावनापक्षा अयुक्ताः। प्रयत्नो भावनेति चे
न्नारथो गच्छतीत्यत्र तदभावप्रसंगात् स्पंद इति चेन्न। मानसत्यागरूपे यजतावव्याप्तेः। उ
भयसाधारणमुदासीनत्वविच्छेदसामान्यं भावनेति चेन्न। शब्दभावनायामव्याप्तेः। न हि श
ब्दस्य विभोरचेतनस्य स्पंदः प्रयत्नो वास्ति। लिङ्लोट्तव्यप्रत्ययमात्रगता शब्दभावना। सर्वाख्यात
तदुक्तं॥ अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातेषु
गम्यत इति। किंच स्पंदादिवादिनोपि न स्वरूपेण स्पंदादीनां भावनात्वमाहुः किं त्वन्योत्पा
दनानुकूलस्वरूपं तस्मादस्मदुक्तैव भावना यथा पचतीत्यत्रौदनफलोत्पत्त्यनुकू
ला तथा यजतीत्यत्र स्वर्गादिफलोत्पत्त्यनुकूला। तस्यां च फलभावनायां प्रत्ययवाच्यायां ए
कपदोपात्तत्वेन प्रत्यासन्नत्वात् प्रकृत्यर्थः करणं न तु द्व्यादितस्य पदान्तरोपात्तत्वेन वि

सर्वाख्यात गतार्थभावना

त्यत्र

राम

२

प्रकृष्टत्वात् साध्यरूपोपि प्रकृत्यर्थः स्वसाधननिष्पादितः सन्नुद्धाक्रोति फलं साधयितुं इत्यादी
नंतु प्रकृत्यर्थोत्पादनेन दृष्ट एवोपकारः । इत्यादिनिष्पादितेन धातुवाच्येन यागादिकरणे
न स्वर्गादिफलोत्पत्तौ सत्यां येयमनुकूलव्यापारात्मा कृतिः शब्दाभिधेया फलोत्पादनासेयं य
ज्यादिधात्वनामन्यतमेन केनापि नाभिधीयते सर्वधात्वर्थानुयायित्वात् तेन भावनायाः
प्रकृत्यर्थत्वमाशंकितुं शक्यं । अस्तु तर्हि धात्वर्थसामान्यमेव भावनेति चेत् न प्रतिधात्व
र्थविलक्षणरूपत्वात् । अन्यद्धि पाकस्योत्पादनं प्रत्यानुकूल्यं अन्यच्च चलनस्य संयोग
विभागोत्पत्त्यनुकूल्यं अन्यथा फलविभागानुपपत्तेः ॥ भिन्नासु भावनाव्यक्तिषु भावनात्वसामान्यमनु
वर्तितं नाम नैतावता प्रकृत्यर्थसामान्यं तद्भवति तस्माद्विशेषरूपात्सामान्यरूपाच्च यज्या
दिधातुवाच्यादन्यैवाख्यातप्रत्ययवाच्या भावना । तथा सति यजेतेत्यत्राख्यातस्य भावयेदि

अधिक
रणमाला

स्यार्थो भवति तत्र किं भावयेत् केन भावयेत् कथं भावयेदित्याकांक्षायां स्वर्गं भावयेद्यागेन भावये
दग्न्यन्वाधानप्रयाजाद्यवघातादिभिरुपकारं संपाद्य भावयेदित्येवं भाव्यकरणेतिकर्त्तव्यतास
मर्पणेनाकांक्षापूरणं तु प्रकरणाम्नातैः सकलैः शाब्दसंदर्भैर्भावनावाचिन आख्यातस्यैव प्र
पंचः। भाव्यांशत्रयवती सेयमर्थभावनेत्युच्यते सा सर्वापि शाब्दभावनाया भाव्या। विधाय
को लिङादिः करणं। अर्थवादसंपादिता स्तुतिरितिकर्त्तव्यता सेयं शाब्दभावना लिङादिभिरे
वगम्यते अर्थभावना सर्वैराख्यातप्रत्ययैर्गम्यत इत्युक्तं। तस्यां चार्थभावनायां स्वर्गस्य भा
व्यत्वं कमियोगादवगम्यते प्रकृत्यर्थस्य करणत्वं तृतीयाश्रुत्या। तथा च श्रूयते दर्शपूर्णमा
साभ्यां स्वर्गकामो यजेत चित्रया यजेत पशुकाम इति तत्र करणत्वमपूर्वं कल्पनामंतरेण न
संभवतीत्यभिधास्यते तस्मादाख्यातप्रत्ययांताज्ञाकार्थपदादपूर्वं गम्यते चिंताप्रयोजनं तु

राम

5

पूर्वपक्षे द्व्याद्युपचारे प्रतिनियमाभावः सिद्धांते तु तत्सद्भावः॥ द्वितीयाधिकरणं॥ अपू
र्वसद्भावसंशये सति नास्ति तत्प्रमानाभावात्फलं यागात्सिध्येच्छास्त्रप्रमाणतः। क्ष
णिकस्य विनष्टस्य स्वर्गहेतुत्वकल्पनं॥ विरुद्धं मानतरेणातः श्रेयोऽपूर्वस्य कल्पनं। अवां
तरव्यापृतिर्वीजशक्तिर्वा यागजोच्यते। अपूर्वमिति तद्भेदः प्रक्रियातोऽवगम्यतां॥ पूर्वाधि
करणे वर्णिताभ्यां यदिदमुक्तमपूर्वस्य कर्मेव परं प्रत्याय केतच्च यजेतेत्याख्यातांतं भावार्थ
परमिति तदनुपपन्नमपूर्वसद्भावे मानाभावात् यजेतेत्याभ्यां प्रकृतिप्रत्ययाभ्यां करणभा
वनयोरभिधानात्। अपूर्वाभावे कालांतरभाविस्वर्गसाधनत्वं विनश्वरस्य यागस्यानुप
पन्नमिति चेन्न। शास्त्रप्रामाण्येन तदुपपत्तेरिति प्राप्ते ब्रूमः। दर्शपूर्णमासाभ्यामिति तृतीय
याश्रुत्यावगतस्य यागस्य स्वर्गसाधनत्वं प्रमितं तद्यथोपपद्यते तथावश्यं भवतापि कल्पनीयं

तत्र किं यावत्फलं यागस्यावस्थानं कल्प्यते किं वा विनष्टस्यापि स्वर्गोत्पादनं । नाद्यः । यागस्य
क्षणिकत्वस्य प्रत्यक्षसिद्धत्वात् । न द्वितीयः । मृतयोर्दंपत्योः पुत्रोत्पत्त्यदर्शनादतो मानांतर
विरुद्धाज्ञ्वदीयकल्पनादस्मदीयमविरुद्धमपूर्वकल्पनं न्याय्यः । कल्पितेप्यपूर्वे तस्यैव
स्वर्गसाधनत्वाद्यागस्य स्वर्गसाधनत्वं श्रुतिविरुध्येतेति चेत् । न । यागावांतरव्यापारोपू
र्वमित्यंगीकारात् नह्युद्यमननिपतयोरवांतरव्यापारयोः सत्त्वे कुठारस्य साधनत्वमपैति
यदि व्यापारवतो यागस्य नाशे व्यापारो न तिष्ठेत्तर्हि यागजन्या काचिच्छक्तिरपूर्वमस्तु श
क्तिव्यवधानेपि यागस्य साधनत्वमविरुद्धं अग्नेः स्वव्यवहितेप्यग्नौ दाहकत्वांगीकारा
द्यथांगारजन्यमौस्वं शांतेष्वप्यंगारेषु जलेनुवर्त्तते तथा यागजन्यमपूर्वं नष्टेपि यागे क
र्त्तर्यात्मन्यनुवर्त्तताम् । तस्मादस्त्यपूर्वं न हि शेषस्तु संप्रदायसिद्धया प्रक्रियया वगंतव्यः ॥

तथाहि। प्रक्रियापूर्वाचार्यैरित्थं दर्शिता प्रथमं तावत्फलवाक्येन कर्मणः फलसाधनता बोध्य
ते यागेन स्वर्गं कुर्यादिति कथं विनश्वरेण फलं कर्त्तव्यमित्यपेक्षायामपूर्वकत्वेनुच्यते कथ
मपूर्वं क्रियत इत्यपेक्षायां यागानुष्ठानप्रकारेणेति तच्चापूर्वं दर्शपूर्णमासयोरनेकवि
धं फलापूर्वं समुदायापूर्वं उत्पत्त्यपूर्वं अंगापूर्वं चेति। येन स्वर्ग आरभ्यते तत्फलापूर्वं॥
अमावास्यायां त्रयाणां यागानामेकः समुदायः पौर्णमास्यामपरः। तयोर्भिन्नकालवर्त्ति
नोः संहत्य फलापूर्वारंभायोगात्तदारंभाय समुदायद्वयजन्यमपूर्वद्वयं कल्पनीयं तयो
रेकैकस्यारंभाय एकैकसमुदायवर्त्तिनां त्रयाणां यागानां भिन्नक्षणवर्त्तित्वेन संघाता
पत्त्यभावाद्यागत्रयजन्यानि त्रीण्युत्पत्त्यपूर्वाणि कल्पनीयानि तेषां चांगोपकारमंतरे
ण निष्पत्तेरंगानां चानेकक्षणवर्त्तिनां संघातासंभवादंगापूर्वाणि कल्पनीयानि। तत्रत्व

एपु

अधिकर
णमाला

यंभागः। संनिपत्योपकारकाण्यवघातादीनि द्रव्यदेवतासंस्कारद्वारेण यागस्वरूपस्यै
वातिशयाधानेन तदुत्पत्त्यपूर्वनिष्पत्तौ व्याप्रियंते तद्वारेण फलापूर्वे। आराद्उपकार
काणि तु यजादीन्युत्पत्त्यपूर्वेभ्यः फलापूर्वनिष्पत्तौ साक्षादेव व्याप्रियंते। एवं प्रकार
भेदे सत्यपि सर्वाण्यंगान्यपूर्वनिष्पत्तावनुगौणानीत्येकरूप्येण स्वभावेन स्वीक्रियं
ते। अनयैव दिशा सर्वत्रापूर्वप्रक्रियावगंतव्या। अत्र गुरुमतमाह। यागक्रियास्वस्व
रूपापरमाण्वात्मसंस्थिता। यावत्फलं नियोगाख्यं नापूर्वमिति चेन्न तत्॥ मानहीनं
क्रियासौक्ष्म्यं नियोगस्तु लिङादिना। अभिधेयः स्वर्गयागादपूर्वं कार्यमस्य तः। गु
रुणा पञ्चियोगाख्यमपूर्वमभिप्रेयते तन्नास्ति कुतः। अंतरेणैव तदपूर्वं फलनिष्पत्तेः राम

ह

६

न च यागनाशात्कथं फलसिद्धिरिति वाच्यं। न हि यागक्रिया सर्वात्मना नश्यति किंतु स्वस्वरू
पत्वेनादृश्यासती स्वर्गदेहारंभकेषु यागसंबंधिद्रव्यगतपरमाणुषु यागकर्त्तर्यात्मनि वावस्था
य फलमारभत इति पूर्वः। नैतद्युक्तमुक्तेर्थे प्रमाणाभावात्। न च नियोगेपि मानाभावः शंक
नीयः। वैदिकलिङादीनां तदभिधायकत्वात् ततो धात्वर्थातिरिक्तं कालांतरभाविकाम्यफ
लसाधनमपूर्वमपि॥ तृतीयाधि॰। अवघातादिना पूर्वमुत्पाद्यं विद्यते न वा। यजत्यादिव
दस्यैव वाक्यवैयर्थ्यमन्यथा। दृष्टे तुषविमोके तु पूर्वं द्रव्यतंत्रता॥ स्याद्यजत्यादिवैषम्यं नि
यमापूर्वकृद्वचः। दर्शपूर्णमासयोः श्रूयते। व्रीहीनवहंति तंडुलान्पिनष्टीति तत्रावघात
पेषणे पूर्वजनके विहितधात्वर्थत्वाद्यजत्यादिधात्वर्थवत्। विपक्षे विधिवाक्यवैयर्थ्यरू
पो बाधकस्तर्कोवगंतव्यः। तुषविमोकचूर्णत्वयोर्दृष्टप्रयोजनयोर्लोकसिद्धत्वेन तादर्थ्ये

प॰ ३ः

ना

7

वघातपेषणयोर्विधिर्व्यर्थः स्यात्। तस्मादस्त्यपूर्वमिति प्राञ्चेब्रूमः। दृष्टफले संभवत्यपूर्वं न
कल्पनीयं। यजत्यादिदृष्टांतस्तु विषमः तत्र हि क्रियाप्राधान्येन द्रव्यपारतंत्र्याभावात् अ
पूर्वसाधनत्वं क्रियाया युक्तं इह तु व्रीहीनिति कर्मकारकविभक्त्या व्रीहीणामीप्सिततम
त्वेन प्राधान्यावगमात् द्रव्यपरतंत्रोऽवघातो द्रव्य एवातिशयं कुर्यात् न त्वपूर्वं जनयति।
न च विधिवैयर्थ्यं नखनिर्भेदादिना तुषविमोकसंभवेप्यवघातेनैवासौ कर्त्तव्य इति यो
नियमस्तस्य नियमस्यापूर्वहेतुत्वेन विधेयत्वात्। तस्मान्नास्त्यवघातादिजन्यमपूर्वं
अत्र गुरुमतमाह। द्वितीयां सक्तुवद्रक्तानियोगे त्वीयतां क्रिया। साक्षादिति न मंतव्यं दृ
ष्टस्यात्रोपपत्तितः॥ सक्तून् जुहोतीत्यत्र द्रव्यप्राधान्यं परित्यज्य द्वितीयाया भंगं कृत्वा
क्रियाप्राधान्याय सक्तुभिर्जुहोतीति तृतीयात्वेन विपरिणामो वक्ष्यते तथा चेह व्रीहिभि

राम
७

रवहंतीतिविपरिणामेनप्रधानभूताक्रियाद्रव्यव्यवधानमंतरेणसाक्षादेवविनियोगेन्वेतु

इतिचेन्नैवंवैषम्यात्तत्रहोमेनसक्तुषुसंस्कारोनसंभवतिभस्मीभूतानामन्यत्रविनियोगासं

भवादित्यभिप्रेत्यसंस्कारकर्मत्वंपरित्यक्तं।इहदृष्टस्तुषविमोकसंस्कारउपपद्यतेवितुषा

णांतेषांपुरोडाशेविनियोगसंभवात्॥ चतुर्थाधिकर०॥ संमार्ष्टिस्रुचइत्यत्रकिंप्रधानाख्य

कर्मता।गुणकर्मत्वमथवादृष्टाभावेऽवघातवत्॥गुणत्वंनहिसंभाव्यंप्राधान्यंतुप्रयाज

वत्।अदृष्टकल्पनेनापिगुणत्वंस्याद्द्वितीयया॥ दर्शपूर्णमासयोर्जुह्वादीनांदर्भैःसंमार्ज

नमाम्नायते।स्रुचःसंमार्ष्टीतितत्रसंमार्जनंप्रधानंकर्म।कुतः।गुणकर्मलक्षणरहितत्वा

त्प्रधानकर्मलक्षणयुक्तत्वाच्च।सूत्रकारोहिकर्मणांराशिद्वयंप्रतिज्ञायतयोर्लक्षणंपृथ

क्सूत्रयामास।तानिद्वैधंगुणप्रधानभूतानि।यैस्तुद्रव्यंचिकीर्ष्यतेगुणस्तत्रप्रतीयेततस्य

अधि

द्रव्यप्रधानत्वात्। येस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि द्रव्यस्य गुणभूतत्वादिति। यैः कर्मभिर्द्रव्यमुत्पादयितुं संस्कर्तुं वेष्यते तेषु कर्मसु गुणत्वं कुतः। तस्य कर्मणो द्रव्यप्रधानत्वात्। द्रव्यं प्रधानमस्येति बहुव्रीहिः। यूपं तक्षत्याहवनीयमादधातीत्यादौ यूपाहवनीयादिद्रव्यमुत्पादयितुमिष्यते। व्रीहीनवहन्ति तण्डुलान्पिनष्टीत्यादौ व्रीह्यादिद्रव्यं संस्कर्तुमिष्टं प्रयाजादिषूक्तवैपरीत्यात्प्रधानकर्मत्वं। एवं सत्यवघातेन यथा व्रीहीणां तुषविमोको दृष्टः संस्कारस्तथा संमार्जनेन स्रुगादिषु कश्चिदिति शायं न पश्यामः। अतोऽवघातवद्गुणकर्मत्वाभावात् प्रयाजादिवत्प्रधानकर्मत्वमिति प्राप्ते ब्रूमः। स्रुच इति द्वितीया कर्मकारके विहिता कर्मत्वं चेप्सिततमत्वे सति भवति कर्तुरीप्सिततमं कर्मेति कर्मसंज्ञाविधानात्। क्रतुसाधनत्वेन स्रुचां युक्तमीप्सिततमत्वं अतः प्रधानभूताः स्रुचः तथा सति संमा

रामजी सहाय

८

र्जनक्रियाया गुणकर्मत्वमवघातवद्भविष्यति। यदि स्तुतिशस्त्रयोर्दृष्टोतिशयो न स्यात्तर्ह्यपूर्वं कल्पनीयं॥ पं
चमाधि०॥ प्रउगं शंसतीत्यादौ गुणत्वे न प्रधानता। दृष्टा देवस्मृतिस्तेन गुणता स्तोत्रशास्त्रयोः॥
स्मृत्यर्थत्वे स्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनं। तेनादृष्टमुपेत्यापि प्राधान्यं स्तुतये मतं॥२॥ ज्यो
तिष्टोमे श्रूयते। प्रउगं शंसति निष्केवल्यं शंसति आज्यैः स्तुवते पृष्ठैः स्तुवत इति। प्रउगनिष्केव
ल्यशब्दौ शास्त्रविशेषनामनी। आज्यपृष्ठशब्दौ तु व्याख्यातौ। अप्रगीतमंत्रसाध्या स्तुतिः शास्त्रं
प्रगीतमंत्रसाध्या स्तुतिः स्तोत्रं। तयोः स्तुतशास्त्रयोः गुणकर्मत्वं युक्तं कुतः तुषविमोकवद्दृष्टा
र्थलाभात्। पठ्यमानेषु मंत्रेषु अनुस्मरणेन देवता संक्रियत इति प्राप्ते ब्रूमः। स्तौतत्यायादे
वतायाः स्तावकैर्गुणैः संबंधकीर्त्तनं स्तौति शंसति धात्वोर्वाच्यार्थः। यदि मंत्रवाक्यानि गुणसंबं
धाभिधानपराणि तदा धात्वोर्मुख्यार्थलाभाच्छ्रुतिरनुगृहीता भविष्यति यदा तु गुणद्वारेणानु

स

स्मरणीयदेवतास्वरूपप्रकाशनपराणि मंत्रवाक्यानि स्युस्तदा धात्वोर्मुख्यार्थो न स्यात्। लोके
हि देवदत्तश्चतुर्वेदाभिज्ञ इत्युक्ते स्तुतिः प्रतीयते तस्य वाक्यस्य गुणसंबंधपरत्वात्। यदा तु देव
दत्तस्वरूपपरता। यश्चतुर्वेदां तमानयेत्यादौ तत्र न स्तुतिप्रतीतिस्तस्य चतुर्वेदसंबंधद्वारे
ण देवदत्तस्वरूपोपलक्षणपरत्वेन गुणसंबंधपरत्वाभावात्। ततश्चाज्ये देवं प्रकाशये त्व
ष्टे देवं प्रकाशये इत्येवं विध्यर्थपर्यवसानाद्वाक्ये मुख्यार्थो बाध्येत ततो धातुश्रुतिमबाधि
तुं स्तोत्रशास्त्रयोः प्रधानकर्मत्वमभ्युपेतव्यं तत्र दृष्टं प्रयोजनं नास्तीति चेत्ततो एवमस्तु॥ ष
ष्ठाधिकरणं॥ देवांश्च याभिर्यजत इत्याख्यातं तु मंत्रगं। विधायकं न चान्येन समत्वात्तद्विधा
यकं। यच्छब्दादेः क्षीणशक्तिर्न विधिः संविधं ततः। आख्यातमभिधानं च प्रधानगुणकर्मणी।
अयं मंत्र आम्नायते। देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सहेति। अय

राम
२

मर्थः। गोपतिर्यजमानो याभिर्गोभिर्देवान्यजते याश्च गा ब्राह्मणेभ्यो ददाति चिरमेव ताभिः सह पर
लोके वतिष्ठत इति। तत्र यथा ब्राह्मणगतमाख्यातपदं प्रधानगुणकर्मणोरन्यतरस्य विधायकं त
था मंत्रगतमपीति चेन्नैवं। यच्छब्दादिना विधिशक्तेः क्षीणत्वात्। सति हि यच्छब्दे तस्य वाक्यस्या
नुवादकत्वं प्रतीयते न तु विधायकत्वं यच्छब्दादेरित्यादिशब्देनोत्तमपुरुषामंत्रणादयः। बर्हि
र्देवसदनं दामीत्युत्तमः पुरुषः। अग्नीदग्नीन्विहरेत्यामंत्रणं। एवं ब्राह्मणेपि यस्योभयं हवि
रार्त्तिमार्छेदित्युदाहरणीयं तस्मादाख्यातस्य प्रधानकर्मविधायकत्वं गुणकर्मविधायकत्वं चे
त्येवं द्वावेव प्रकारौ न भवतः किंतु अभिधायकत्वमित्यस्ति तृतीयः प्रकारः। ततो न मंत्रगता
ख्यातस्य विधायकत्वं॥ सप्तमाधि०॥ अहे बुध्निय मंत्रं म इति मंत्रस्य लक्षणं। नास्त्यस्ति वास्य
नास्त्येव दव्याप्त्यादेरवारणात्। याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितं। तेनुष्ठानस्मारका

10

दो मंत्रशब्दं प्रयुंजते। आधान इदमाम्नायते। अहे बुध्निय मंत्रं मे गोपायेति। तत्र मंत्रस्य लक्षणं
नास्ति अव्याप्त्यतिव्याप्त्यो र्वारयितुमशक्यत्वात्। विहितार्थाभिधायको मंत्र इत्युक्ते वसंताय क
पिंजलानालभेत इत्यस्य मंत्रस्य विधिरूपत्वादव्याप्तिः। मननहेतुर्मंत्र इत्युक्ते ब्राह्मणेतिव्या
प्तिः। एवमसिपदांतो मंत्र उत्तमपुरुषांतो मंत्र इत्यादिलक्षणानां परस्परमव्याप्तिरिति चेन्मै
वं। याज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वात्। तच्च समाख्यानमनुष्ठानस्मारकादीनां मंत्र
त्वं गमयति। उरु प्रथस्वेत्यादयोऽनुष्ठानस्मारकाः। अग्निमीळे पुरोहितमित्यादयः स्तुतिरू
पाः। इषेत्वादयस्त्वांताः। अग्न आयाहि वीतय इत्यादय आमंत्रणोपेताः। अग्नीदग्नीन्विहरे
त्यादयः प्रैषरूपाः। अधःस्विदासीदुपरिस्विदासीदित्यादयो विचाररूपाः। अंबेंबिकेंबालि
केन मा नयति कश्चनेत्यादयः परिदेवनरूपाः। पृच्छामि त्वां परमंतं पृथिव्या इत्यादयः प्रश्नरूपाः

वेदिमाहुः परमंतं पृथिव्या इत्यादय उत्तररूपाः। एवमन्यदप्युदाहार्यं। ईदृशेष्वत्यंतविजाती
येषु समाख्यानमंतरेण नान्यः कश्चिदनुगतो धर्मोस्ति यस्य लक्षणत्वमुच्येत लक्षणस्योप
योगश्च पूर्वाचार्यैर्दर्शितः। ऋषयोपि पदार्थानां नांतं यांति पृथक्त्वशः। लक्षणेन तु सिद्धाना
मंतं यांति विपश्चित इति तस्मादभियुक्तानां मंत्रोयमिति समाख्यानं लक्षणं॥ अष्टमाधि०॥
नास्त्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यते यतः॥ नास्तीयत्तो वेदभागा इति क्लृप्तेरभावतः॥ मंत्रश्च
ब्राह्मणं चेति द्वौ भागौ तेन मंत्रतः। अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणं। चातुर्मास्येष्विदं
माम्नायते। एतद्ब्राह्मणान्येव पंच हवींषि इति तत्र ब्राह्मणस्य लक्षणं नास्ति। कुतः। वेदभा
गानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयि
तुमशक्यत्वात्। पूर्वोक्तो मंत्रभाग एकः। भागांतराणि कानिचित्तत्र वैरुदाहर्तुं संगृहीतानि। हेतु

निर्वचनं निंदा प्रशंसा संशयो विधिः। परकृतिः पुराकल्पो व्यवधारणकल्पनेति। तेन ह्यन्नं क्रि
यत इति हेतुः। तद्दध्नो दधित्वमिति निर्वचनं। अमेध्या वै माषा इति निंदा। वायुर्वै क्षेपिष्ठेति प्र
शंसा तद्विचिकित्सां जुहवानि मा होषमिति संशयः। यजमानेन संमितोदुंबरी भवतीति वि
धिः। माषानेव मह्यं पचतेति परकृतिः। पुरा ब्राह्मणा अभैषुरिति पुराकल्पः। यावतोऽश्वान्
प्रतिगृह्णीयात्तावतो वरुणांश्चतुष्कपालान्निर्वपेदिति विशेषावधारणकल्पना। एवमन्य
दप्युदाहार्यं न वहेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणं मंत्रेष्वपि हेत्वादिसद्भावात्। तथा
हि इंद्रवो वामुशंति हीति हेतुः। उदानिषुर्महीरिति णं तस्मादुदकमुच्यत इति निर्वचनं।
मोघमन्नं विंदते अप्रचेता इति निंदा। अग्निर्मूर्धा दिवः ककुदिति प्रशंसा। अधःस्विदासीदु
परिस्विदासीदिति संशयः। कपिंजलानालभत इति विधिः। सहस्रमयुतं ददामीति परकृतिः

यज्ञेन यज्ञमयजंत देवा इति पुराकल्पः। इति करणबहुलं ब्राह्मणमिति चेन्न इत्यददा इत्ययजथा
इत्यपच इति ब्राह्मणो गायेदित्यस्मिन्‌ ब्राह्मणेन गातव्ये मंत्रेऽतिव्याप्तिः। इत्याहेत्यनेन वाक्येनो
पनिबद्धं ब्राह्मणमिति चेन्न राजाविघं भगं भक्षीत्याह यो वा रक्षाः शुचिरस्मीत्याहेत्यनयोर्मंत्रयो
रतिव्याप्तेः। आख्यायिकारूपं ब्राह्मणमिति चेन्न यमयमीसंवादसूक्तादावतिव्याप्तेः। तस्मा
न्नास्ति ब्राह्मणलक्षणमिति प्राप्ते ब्रूमः। मंत्रब्राह्मणरूपौ द्वावेव वेदविभागावित्यंगीकारात्‌
मंत्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भवतीति॥ नव
माधिकरणं॥ उरुप्रवरनाम्नोः किं मंत्रतास्त्यथवा न हि॥ मंत्राः स्तदेकवाक्यत्वान्न तल्लक्षण
वर्जनात्‌॥१॥ अग्नये जुष्टं निर्वपामीत्यस्य सौर्यचरौ सूर्याय जुष्टं निर्वपामीत्येवं पदांतरप्र
क्षेप ऊहः। अदीक्षिष्टायं ब्राह्मण इत्यस्य मंत्रस्याम्नातत्वेन प्रयोगकाले ब्राह्मणनामधेयवि

ऋषि ऋषिं तदायं प्रवरं चैवं पठंति असौ देवदत्तोऽमुष्य पुत्रोऽमुष्य पौत्रोऽमुष्य नप्तामुष्याः पुत्रो
मुष्याः पौत्रोऽमुष्याः नप्तेति आंगिरसबार्हस्पत्यभारद्वाजगोत्र इति च। एतेषामृष्यप्र
प्रवरनामधेयानां मंत्रत्वमस्ति कुतः मंत्रेण सहैकवाक्यत्वावगमादिति चेन्नैवं। याज्ञि
कप्रसिद्धिरूपस्य मंत्रलक्षणस्योहादिष्वभावात्। न ह्यध्येतार ऊहादीन् मंत्रकांडेऽधी
यते तस्मान्नास्ति मंत्रत्वं। दशमेकादशाद्वादशाधिकरणमारचयति॥ नार्क्सामयजु
षां लक्ष्म सांकर्यादिति शंकिते॥ पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्त्वसंकरः॥८॥ इदमा
म्नायते। अहे बुध्निय मंत्रं मे गोपाय यमृषयस्त्रैविदा विदुः ऋचः सामानि यजूंषी
ति। त्रीन्वेदानूवदंतीति त्रिविदः। त्रिविदां संबंधिनोऽध्येतारस्त्रैविदस्ते च मंत्रभागं ऋ

ग्राम
१२

गादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना। तत्र त्रिविधानामृक्सामयजुषां व्यवस्थितं ल
क्षणं नास्ति कुतः सांकर्यस्य दुःपरिहरत्वात् अध्यापकप्रसिद्धेः ऋग्वेदादिषु पठितो मंत्र इति
हि लक्षणं वक्तव्यं तच्चसंकीर्णं देवो वः सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभि
रित्ययं मंत्रो यजुर्वेदसंप्रतिपन्नयजुषां मध्ये पठितः। न तस्य यजुष्ट्वमस्ति तद्ब्राह्मणे सावि
त्र्यर्चेत्यृक्त्वेन व्यवहृतत्वात् एतत्साम गायन्नास्त इति प्रतिज्ञाय किंचित्साम यजुर्वेदे गी
तं। अच्छितमस्यच्युतमसि प्रहरणं शंसितमसीति त्रीणि यजूंषि सामवेदे समाम्नातानि
तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नायंते तस्मान्नास्ति लक्षणमि
ति चेत् न पादादीनामसंकीर्णलक्षणत्वात्। पादवद्धेनार्थेन चोपेता वृत्तबद्धा मंत्रा ऋचः
गीतिरूपा मंत्राः सामानि। वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मंत्रा यजूंषीति उक्तेन

नकापिसंस्कारः॥ त्रयोदशाधिकरणं॥ प्रोक्षणीरासादयेतिनिगदस्यविधाद्वहिः। यजुर्वो
द्वैस्त्वधर्मस्यभेदादस्यचतुर्थता॥१॥ परप्रत्यायनार्थत्वादुच्चैस्त्वंयजुरेवसः। तल्लक्षणेनयु
क्तत्वात्त्रैविध्यमितिसुस्थितं। प्रोक्षणीरासादयेध्मावर्हिरुपसादयअग्नीदग्नीन्विहरवर्हि
स्तृणीहिइंद्रआगच्छेत्यादयोनिगदाआम्नाताः परसंबोधनार्थामंत्रानिगदाः। एतेचपूर्वो
क्तेभ्यः ऋग्यजुःसामभ्योवहिर्भूताश्चतुर्थप्रकाराः कुतः पादगीतोर्द्धकसामलक्षणयोर
भावात्प्रश्लिष्टपाठस्ययजुर्लक्षणस्यसत्त्वेपिधर्मभेदेनयजुष्ट्वंतर्भावानुपपत्तेः। उपांशु
यजुषोच्चैर्निगदेनेतिहिधर्मभेदइतिप्राप्तेब्रूमः। वहिर्ब्राह्मणाभोज्यंतांपरिव्राजकास्त्वंत
रित्यत्रसत्येवपरिव्राजकानांब्राह्मणत्वेपिपूजानिमित्तोविशेषोयथातथानिगदानांयजुर्ल
क्षणोपेतत्वेनयजुषामेवसतांपरप्रत्यायननिमित्तउच्चैस्त्वधर्मः। ततोमंत्राणांत्रैविध्यंसु

राम

स्थितं ॥ चतुर्दशाधिक० ॥ देवस्येति त्वै वाक्यस्य भिन्नत्वमथवैकता। एकप्रयोजकस्या
त्र दुर्वोधत्वेन भिन्नता। विभागे सति साकांक्षस्यैकार्थत्वं प्रयोजकं। तस्माद्वाक्यैक्यमनेन
यजुरंतोऽवधार्यते। दर्शपूर्णमासयोराम्नायते। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्वाहुभ्यां
पूष्णो हस्ताभ्यां अग्नये जुष्टं निर्वपामीति। तत्र वाक्यानि भिन्नानि भवितुमर्हंति कुतः। ए
कत्वनियामकस्य दुर्वोधत्वात् अर्थैकं वा वाक्यैक्यप्रयोजकं स्यादिति चेन्न। एकस्मिन्न
देति व्याप्तेः पदसमूहस्य वाक्यत्वे समूहानामत्र वहूनां संभवाद्वाक्यभेदः स्यादिति चे
न्नैवं। यद्विभागे साकांक्षमविभागे कार्थं तदेकं वाक्यमिति प्रयोजकस्य वोद्धुं शक्यत्वा
द्विभागे साकांक्षमित्युक्तेऽति व्याप्तिः स्यात् स्योनं ते सदनं कृणोमि घृतस्य धारया सुशे

आधि·
भवानं

15

कल्प्ययामितस्मिन्सीरामृते प्रतितिष्ठ ब्रीहीणांमेधः सुमनस्यमानइत्यत्रतस्मिन्नि
त्यादिपदसमूहस्यविभागेसतिप्रकृतवाचितच्छब्दार्थनिर्णयायपूर्वपदसमूहसाकां
क्षत्वमस्त्यतस्तद्व्यवच्छेत्तुमेकार्थमित्युच्यतेनहितत्रैकार्थत्वमस्तिपूर्वसमूहस्यसद
नकरणमर्थः उत्तरसमूहस्यपुरोडाशप्रतिष्ठापनं।स्योनंसमीचीनंसुशेवंसुष्ठुसेवि
तुंयोग्यंमेधःसारभूतपुरोडाशेत्यर्थः।अत्रद्वयोःपदसमूहयोर्वाक्यद्वयत्वमुभयवादि
सिद्धंतदेतदेकार्थमित्यनेनव्यावर्त्यते।एकार्थमित्युक्तेऽतिव्याप्तिःस्यात्भगोवांविभ
जतुपूषावांविभजत्वित्यनयोर्विभजनमंत्रत्वेनसंमतयोःपदसमूहयोस्तात्पर्यविष
यस्यैवद्रव्यविभागरूपस्यार्थस्यैकत्वात्तद्व्यवच्छेत्तुंविभागेसाकांक्षमित्युक्तं।प्रकृतेत्वग्ने
येजुष्टमित्यादिसमूहेपृथक्कृतेपूर्वोदेवस्यत्वेतिसमूहःसाकांक्षोभवति।एकीकृते

राम

तु कृत्स्नस्यैक एव निर्वापोऽर्थः। एतेनैकवाक्यत्वनिर्णयेनानियतपरिमाणस्य यजुषोऽवसा
नं निश्चेतुं शक्यं॥ २। पंचमदर्शाधि०॥ इषे त्वादिर्मन्त्र एको भिन्नो वैकः क्रियापदे। असत्य
र्थस्मारकत्वादेकाध्याहृतस्य कल्पनात्॥ छेदने मार्जने चैतौ विनियुक्तौ क्रियापदे॥ अध्याहृते
स्मारकत्वान्मंत्रभेदोऽर्थभेदतः॥ इषे त्वोर्जे त्वेत्याम्नायते। सोयं पदसमुदाय एको मंत्रः कुतः अ
स्याध्याहृतार्थत्वेनैकस्यैवाध्याहृतस्य कल्पने लाघवात्। न चोरु प्रथस्वेत्यादिमंत्रवदनुष्ठेयार्थ
स्मारकत्वं संभवति। क्रियापदाभावेन तदर्थप्रतीत्यभावादिति प्राप्ते ब्रूमः॥ इषे त्वेति छिन
त्ति ऊर्जे त्वेत्यनुमार्ष्टि इति पलाशशाखायाश्छेदनमार्जनयोरेतौ विनियुक्तौ ततस्तदनुसा
रेण छिनत्ति अनुमार्जतीत्येवं क्रियापदेऽध्याहृते सत्यनुष्ठेयार्थस्मारकत्वात् अर्थभेदेन वा
क्यभेदाद्यजुर्मंत्रभेदः इषे इष्यमाणाय अन्नाय भोः पलाशशाखे त्वां छिनद्मि ऊर्जे रसाय वला

15

यत्वा त्वा मनु माऽर्क्षीत्यर्थभेदः। एवमायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामित्यादौ क्लृप्ति
सामान्यरूपस्यार्थस्य एकत्वेप्यायुरादिभिर्भिन्नत्वादर्थभेदस्य वाक्ययोः स्पष्टत्वात् क्लृप्तीर्य
जमानं वाचयतीति क्लृप्तिवत् तस्य चोदितत्वाच्च यजुर्भेदो द्रष्टव्यः॥ षोडशाधि०॥ यातेऽग्ने
ग्नेरजेत्यध्याहारो यद्वानुषंजनं। तन्वित्यन्यशेषत्वादध्याहारोऽत्र लौकिकः। वेदाकांक्षाप
रणीया वेदेनेत्यनुषंजनं। अत्यशेषोपि बुद्धिस्थो लौकिकस्तु न तादृशः॥ ज्योतिष्टोमे उपस
द्दोमेष्वेवमाम्नायते। यातेऽग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो अपावधीत्त्वेषं व
चो अपावधीत्स्वाहा। यातेऽग्ने रजाशया। यातेऽग्ने हराशया इति। अयमर्थः। अयसा
रजतेन हिरण्येन च निर्मिता अग्नेस्तिस्रस्तनवः। तास्त्वाद्या येयमुक्ता तनूः साऽतिशये
न वर्षिष्ठा गह्वरेतीष्ठोऽद्व्येलोहेऽवस्थिता तया तन्वा क्षुत्पिपासेऽउपपातकं वीरहत्यादि महा

पातकं च हतवानस्मीति। तथा च ब्राह्मणं। उग्रं वचो ऽपावधीत्त्वेषं वचो ऽपावधीत्स्वाहेति अशनापिपासे ह वा उग्रं वचः। एनश्च वैरहत्यं च त्वेषं वच इति तत्र स्वाहांतः प्रथमो मंत्रः संपूर्णवाक्यत्वान्निराकांक्षः। द्वितीयतृतीययोराकांक्षां पूरयितुमुचितो लौकिको वाक्यशेषोऽध्याहर्त्तव्यः। न हि तन्न वर्षिष्ठे इत्यादिभागस्तयोरन्वेतुं योग्यः। तस्य प्रथममंत्रशेषत्वादिति प्राप्ते ब्रूमः। वैदिकयोर्मंत्रयोराकांक्षा वैदिकेनैव वाक्यशेषेण पूरणीया। ततस्तन्न वर्षिष्ठे इत्यादिभाग उत्तरयोर्मंत्रयोरनुषज्यते। यद्यप्यसावन्यमंत्रस्य शेषस्तथापि बुद्धिस्थः सन् कल्पनीयादध्याहारात्सन्निकृष्यते तस्मादनुषंगः कर्त्तव्यः॥ सप्तदशाधि.॥ नानुषंगोऽनुषंगो वा छिद्रेण त्यस्य शेषिणो। चित्पतिस्त्वेत्यनाकांक्षावतो नात्रानुषज्यते। करणत्वे क्रियापेक्षं क्रिया त्वेका पुनात्विति। मंत्रत्रये ततस्तद्द्वारा सर्वत्रो

षोनुषज्यते। ज्योतिष्टोमे दीक्षाप्रकरणे पठ्यते। चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु
देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति तत्र तृतीयमंत्रशेषोऽ
च्छिद्रेणेत्यादिभागः प्रथमद्वितीयमंत्रयोर्नानुषज्यते कुतः। निराकांक्षत्वात्। न हि चित्प
तिस्त्वा पुनातु वाक्पतिस्त्वा पुनात्वित्यनयोः शेषिणोः संपूर्णवाक्ययोः काचिच्छेषाकांक्षा
स्तीति प्राप्ते ब्रूमः। मा भूच्छेषिणोराकांक्षा तथापि शेषस्याकांक्षास्तीति। पवित्रेण रश्मि
भिरित्युक्ते करणं हि क्रियामपेक्षते। क्रिया च पुनात्वित्येषा त्रिष्वपि मंत्रेष्वेका तया क्रिय
या संबद्धः शेषः क्रियाद्वारा तृतीयमंत्रे निरपेक्षोपि यथान्वेति तथा पूर्वयोरप्यन्वेतुमर्ह
ति तस्मादस्त्यनुषंगः॥ अष्टादशाधि०॥ गच्छतामिति शब्दस्यानुषंगोस्ति न वोपरि। सं
यच्छत पतिरित्यत्र योग्यत्वात्सोस्ति पूर्ववत्॥ तदेकवचनं मध्यमंत्रे गानीत्यनेन न हि। ना

न्वेतित द्व्यवायेन नोपर्यप्यनुषज्यते ॥२॥ अग्नीषोमीयपशौ श्रूयते। सं ते प्राणो वातेन
गच्छतां समङ्गानि यजत्रैः सं यज्ञपतिराशिषेति। अयमर्थः। भोः पशो तव प्राणो वातेन
वाह्येन वायुना संगच्छतां तव हृदयाद्यङ्गानि यागविशेषैः संयुज्यन्तां यज्ञपतिराशिषा
संयुज्यतामिति। तत्र यज्ञपतिरित्यस्मिन् तृतीयमन्त्रे समित्युपसर्गस्य क्रियापदाकां
क्षत्वात् प्रथममन्त्रगतस्य गच्छतामिति पदस्य एकवचनान्तस्य यज्ञपतिशब्देनान्वेतुं
योग्यत्वात् पूर्वबुद्धिस्थत्वेन संनिहितत्वादाकांक्षासंनिधियोग्यतासद्भावेन क्रिया
पदमनुषज्यत इति प्राप्ते ब्रूमः ॥ मध्यममन्त्रे बहुवचनान्तेनाङ्गानीत्यनेनान्वेतुमयो
ग्यत्वात्तद्व्यवायेन बुद्धिसंनिधानाभावान्नास्त्यनुषङ्गः। ततो द्वितीयतृतीयमन्त्रयोर्यथोचि

भा०द्वि०

तं वाक्यशेषोऽध्याहर्तव्यः॥ इति माधवीये जैमिनिन्यायमालाविस्तरे द्वितीयाध्यायस्य प्र०
द्वितीयपादस्य प्रथमाधिकरणमारचयति॥ ददाति यजती त्यादौ भावनैक्यमुतान्यता॥
आख्याते ख्यात्तदेकत्वं धातुभेदो प्रयोजकः॥ धातुभेदेन भिन्नत्वमाख्याते श्रूयते ततः॥ उ
त्पत्त्येकानुरक्तत्वाद्भिद्यंते भावना मिथः। इहैकप्रकरणगतान्यपर्यायधातुनिष्पन्नान्या
ख्यातानि यजति ददाति जुहोतीत्यादीन्युदाहरणं। तानि चैवं श्रूयंते। सोमेन यजेत हिरण्य
मात्रेयाय ददाति दाक्षिणानि जुहोतीति तेषु भावना। वाचिन आख्यातस्यैकत्वाद्भाव
नाया एकत्वं युक्तं। न च धातुभेदाद्भावनायाः प्रयोजकं तच्चाख्यातं प्रति धातुभिन्नं न
हि बहूनां धातूनामुपरि एक आख्यातप्रत्ययः श्रूयते नापि व्याकरणे धातुसमूहादेक
माख्यातं विहितं तत आख्यातानां बहूनामेकैकधातुविशेषानुरक्तत्वेनोत्पन्नानां भा

17

ता

भेदः॥ नहि॥ चित्वाभावेन धातोस्तस्याप्रयोजकत्वादिति भावः
ब्रूमः॥ आख्यातस्यैव भावप्रायना

भावना वा चित्वेन यागदानहोमभावनाः परस्परं भिद्यंते। अत्र गुरुमतमाह। नियोगैकत्व
तः शास्त्रमभिन्नमिति चेन्न तत्॥ धातुभेदाच्छास्त्रभेदे नियोगो भिद्यते बलात्॥ कर्मभेदचिं
तानाध्यायार्थः किंतु शास्त्रभेदचिंतेति गुरोर्मतं। तत्र यजेत दद्यात् जुहुयादित्येतेषु लिङ्
प्रत्ययवाच्यस्य नियोगस्यैकत्वाद्धातूनां नियोगवाचकत्वाभावेनाप्रयोजकत्वादे
कनियोगार्थैकत्वं शास्त्रमेकमिति पूर्वः पक्षः। प्रतिधातु लिङ् प्रत्ययस्य भिन्नत्वाद्धात्व
र्थानुबंधभेदेन तद्विशिष्टे नियोगेपि भेदस्यावारयितुमशक्यत्वात् तस्मान्नियोगानु शास्त्र
भिन्नमिति राद्धांतः॥ द्वितीयाधिक॰ समिधो यजतीत्यादावेकत्वमुत भिन्नता॥
धातुप्रत्यययोरैक्यादेकत्वं भिन्नता कुतः। अभ्यासात्कर्मभेदोत्र नामत्वान्न विधिर्गु
णे। विधित्वं श्रुतितो भाति संनिधेरनुवादता॥२॥ दर्शपूर्णमासयोः श्रूयते समिधो यज

माध्य

18

ति। तन्न नघातं यजति इज्येयजतिर्वाहिर्यजति स्वाहाकारं यजतीति। तत्र पंचकृत्वः श्रूय
माणे यजतिपदे पूर्वोक्तेषु यजतिददातीत्यादिपदेष्विव धातुभेदो नास्ति येन भावनाभे
दः स्यात् शंकेत तस्माद्दारख्यानैकप्रयुक्तभावनैक्यमनिवार्यमिति चेन्मैवं। यजतिपदा
भ्यासेन कर्मभेदावगमात् कर्मैकत्वे भ्यासो निरर्थकः स्यात्। अथोच्यते। समिधो यज
तीत्यनेन प्रथमश्रुतेन वाक्येन विहितं समिन्नामकं यागमुपरितनैश्चतुर्भिर्यजतिप
दैरनूद्य तन्तनपादादयो देवतारूपाद्रव्यरूपा वा गुणाश्चत्वारो विकल्पिता विधीयंते
ततो नुवादार्थत्वान्नाभ्यासवैयर्थ्यमिति तन्न। तनूनपादादिशब्दानां यागनामत्वेन
गुणविधित्वाभावान्न तावदत्र देवताविधिः चतुर्थीतद्धितयोरश्रवणान्नापि द्रव्यवि
धिः तृतीयांतत्वाभावान्न तोग्निहोत्रं जुहोतीत्यादाविवद्वितीयांतानां मुख्यं नामत्वं। यच्च

राम

चतुर्णामुपरितनानां यजतिपदानामनुवादत्वं तदसत्तेषां विधायकत्वात्। यथा समिधो य
जतीत्यत्र यजतिपदे विधित्वं श्रुत्या प्रतीयते तथान्येष्वपि चतुर्षु पदेषु विधित्वं श्रौतं। अनुवा
दत्वं तु पुरोवादरूपस्य समिधो यजतीत्यस्य सन्निधिनावगम्यते। सन्निधिश्च श्रुतेर्दुर्वलः।
विधित्वे च पूर्ववाक्यविहितस्य समिन्नामकस्य यागस्य पुनर्विधानायोगात् तनूनपादादि
नामकानि यागांतराणि विधीयंते। नन्वेवं सति संज्ञाभेदात्कर्मभेदः संपद्यते न त्वभ्यासा
त् तथा सति वक्ष्यमाणाधिकरणेन संकीर्येत मैवं वैषम्यात्। अथैष ज्योतिरित्यस्मिन्
वक्ष्यमाणोदाहरणे यागावगमात् प्रागेव संज्ञात्वावगमात् संज्ञायाः कर्मभेदहेतुत्वं। इ
ह तु विधायकैर्यजपदैर्यागेष्ववगतेषु भेदश्चाभ्यासादवगते भिन्नानां यागानां समित्सं
ज्ञायाः अन्याः संज्ञाः अपेक्षिता इति तनूनपादादीनां संज्ञात्वं पश्चादवगम्यते तस्माद

19

भ्यास एवात्र भेदहेतुः॥ तृतीयमा॰॥ एवं विद्वान्पौर्णमासीममावास्यामितीरितं। कर्मा
न्यद्भुत एवोक्तिसमुदायानुवादकं॥ कर्मांतरं स्यादभ्यासाद्ध्रौवं द्रव्यं हि देवता॥ वार्त्रघ्नी
त्यादितो ऽभ्यानुवादस्तु न युज्यते॥ वार्त्रघ्नीत्याज्यभागं गव्यवस्योक्तेर्न देवता। पौर्णस
न्धते पौर्णमासी युक्तं त्रिकं तथा॥ अमेत्यपि समहस्याद्वित्वसिद्धिः प्रयोजनं। सहस्थि
तिः पौर्णमास्यामित्युक्तिभ्यां त्रिके त्रिके॥ विद्वद्वाक्यविधौ विध्यावृत्तिराग्नेयकादिना॥
विहितस्य फलित्वेन प्राधान्यमितरे गुणाः॥ इदमाम्नायते। य एवं विद्वान्पौर्णमासीं
यजते य एवं विद्वानमावास्यां यजत इति अत्र यजतिना कर्मांतरं विधीयते न तु प्रक
ता आग्नेयादयः षड्यागा अनूद्यंते। आग्नेयादयस्त्र कालसंयुक्तास्तस्मिन्प्रकरणे
वमाम्नायंते। यदाग्नेयोऽष्टाकपालो ऽमावास्यायां पौर्णमास्यां चाच्युतो भवति। ताव ब्रूता

मग्नीषोमावाज्यस्यैव तावुपांशु पौर्णमास्यां यजन्निति। ताभ्यामेतमग्नीषोमीयमेकाद
शकपालं पूर्णमासे प्रायच्छदिति। ऐंद्रं दध्यमावास्यायां। ऐंद्रं पयोमावास्यायामिति। ए
तेभ्यः प्रकृतेभ्यः षड्भ्यः आग्नेयादिभ्यो विकृत्वावस्य विहितस्य कर्मणो ऽयतेसति प्रवाधि
करणन्यायेन विध्यभ्यास उपपद्यते न च कर्मांतरे द्रव्यदेवतयोरभावः। ध्रौवाज्यादि
सद्भावात्। अत एवोक्तं ध्रौवं साधारणं द्रव्यं देवतामांत्रवर्णिकी। रूपवंतो ततो यागो वि
धीयेते पृथक्तयेति। सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति ध्रौवस्य सा
धारणत्वं श्रुतं देवतायामांत्रवर्णिकत्वमित्यमुन्नेतव्यं तस्मादत्र ध्रौवपौर्णमास्यामनूच्ये
ते वृधन्वती अमावास्यायामिति वात्रघ्नो वृधन्वत्सो वत्सश्चोक्रमेण कालद्वयोपेते कर्म
णि विधीयेते तत्राग्निर्वृत्राणि जंघनदित्येको वार्त्रघ्नो मंत्रः। त्वं सोमासि सत्पतिस्त्वं राजोत

अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया ... त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा त्वं भद्रो असि क्रतुः वार्त्रघ्नौ
अग्निः प्रत्नेन जन्मना शुंभानस्तन्वं स्वां कविर्विप्रेण वावृधे। सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः सुमृडीको न आविश इति

वृत्रहा इत्यपरः। तयोरुक्तावग्नीषोमौ पौर्णमासस्य देवता। एवमनंतराम्नातयोर्वृद्धिधातु
युक्तयोर्मंत्रयोरुक्तौ अग्नीषोमावमावास्यादेवता आभ्यां द्रव्यदेवताभ्यां रूपवत्वाद्यागां
तरमत्र विधीयते। षड्यागानुवादत्वे तदनुवादेन विधेयांतरस्य कस्यचिददर्शनाद्विद्वद्वा
क्यमनर्थकं स्यान्न केवलं तदानर्थक्यं किंतु पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाम
ममावास्यया यजेतेत्येतदपि व्यर्थं स्यात्। न चैतत्कालविधायकं यदाग्नेयोऽष्टाकपाल इ
त्याद्युत्पत्तिवाक्यैरेव तद्विधानात् कर्मांतरत्वे तु कालं विधास्यति तस्मात् कर्मांतरविधिरि
ति प्राप्ते ब्रूमः। आस्तां तावत् द्रव्यं देवता तु विधित्सितस्य कर्मांतरस्य सर्वथा न लभ्यते वा
र्त्रघ्नो वृधन्वन्तौ आज्यभागदेवताप्रतिपादकत्वात् होत्रे मंत्रकांडे सामिनीरावाहननिग
दं प्रयाजमंत्रांश्चाम्नाय प्रयाजानंतरभाविनोराज्यभागयोः क्रमेण वार्त्रघ्नौ वृधन्वत्यौ चा

20

म्नाते लिंगं वाग्निविषयं सोमविषयं च तत्रोपलभ्यते ततो लिंगक्रमाभ्यामाज्यभागविषयत्व मवगम्यते । यत्तु वार्त्रघ्नी पौर्णमास्यामित्यादि वाक्यं तल्लिंगक्रमलब्धयो राज्यभागांगयोर्मंत्रयुगलयोः कालद्वये व्यवस्थामाचष्टे न तु न तनकर्मांगतां तयोर्विदधाति अतो रूपराहित्याद्विद्वाक्यं कर्मांतरविधायकं न भवति किं तर्हि पूर्वप्रकृते घ्वाग्नेयादिषु षट्सु त्रिकरूपो द्वौ समुदायावनुवदति न च कालवाचिभ्यां पौर्णमास्यमावास्या शब्दाभ्यां यागानुवादानुपपत्तिः । तत्कालविहितयोर्यागत्रिकयोरुपलक्षितत्वात् । न चानुवादो व्यर्थः समुदायद्वित्वसिद्धेस्तत्प्रयोजनत्वात् । तत्सिद्धौ च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यस्मिन्फलवाक्ये षड्यागविवक्षया द्विवचननिर्देश उपपद्यते । यदप्युक्तमनुवादपक्षे पौर्णमास्यामित्यादि वाक्य वैयर्थ्यमिति । तदयुक्तं कालविधानासंभवेप्येकैकस्य त्रिकस्य सहप्रयोग

आध.

२१

विधानात् आग्नेयोपांशुयाजाग्नीषोमीयानां त्रयाणां पौर्णमासीकालविहितानां सहप्रयो
गः। पौर्णमास्येत्यनेन तृतीयैकवचनांतेन विधीयते। एवमितरत्रापि। ननु विद्वद्वाक्यस्य कर्मा
न्तरविधायकत्वाभावेपि नानुवादकत्वं तस्य यागविधायकत्वाभ्युपगमात्। आग्नेयोष्टाकपा
ल इत्यादिवाक्यानि तु विहितयागानुवादेन द्रव्यदेवतालक्षणगुणविधायकानीति चेन्न। त
थासत्येकेन वाक्येनानेकगुणविध्यसंभवात् प्रतिगुणं च यागविधौ विध्यावृत्तिः प्रसज्येत। आ
ग्नेयादिवाक्या[illegible]नां विधायकत्वं तु विशिष्टविधित्वात् नास्ति विध्यावृत्तिदोषः। तस्मादाग्ने
यादिवाक्यविहितानां विद्वद्वाक्यमनुवादकं। किंचानुवादमनभ्युपगम्य कर्मांतरविधिं वद
तः प्रयाजादीनामाग्नेयादीनां च गुणप्रधानभावो न सिध्येत् तथा समिधो यजति आघारमाघा
रयतीत्यादयः कालयोगरहिताः केचिद्विधय आम्नाताः। यदाग्नेयोष्टाकपालोमावास्यायां

र्णपौर्णमास्यां चेत्यादयः कालयुक्ताः अपरे ते षामुभयेषां प्रकृतत्वाद्दर्शपूर्णमासाभ्यां स्वर्गकामो
यजेतेति वाक्येन सर्वेषां फलसंबंधो बोधनीयः। दर्शपूर्णमासाभ्यामिति द्विवचनमत्र बहुवचन
त्वेन परिणतव्यं विधिद्वाक्यविहितेष्ठकर्मांतरे प्रयाजादय आग्नेयादयश्चेत्येषु द्वित्वासंभवात्
सर्वेषां च फलसंबंधे राजसूयगतेष्टिपशुसोमवत्समप्रधान्यात् प्रयाजादीनां गुणभावो न
स्यात्तदभावे चानंगत्वात्सौर्यादिविकृतिष्वाग्नेयादीनामिवातिदेशो न स्यात्। अनुवादपक्षे तु
त्रिकयोः कालयोगेन दर्शपूर्णमासशब्दार्हत्वात्समुदायद्वित्वेन द्विवचनार्हत्वाच्च आग्नेयादी
नामेव फलसंबंधेन प्राधान्यं प्रयाजादीनां तु गुणभाव इति न कोपि दोषः। तस्माद्द्विवद्वाक्य
मनुवादकं॥ चतुर्थाधि०॥ उपांशुयाजमित्येषोनुवादो आथवा विधिः। विष्ण्वादिवाक्ये
विस्पष्टविधेरस्यानुवादता। जामित्वोक्तेरंतरालउपांशुगुणके विधौ। सत्यर्थवादो विष्ण्वादि

स्तद्रूपं धौव मंत्रतः। इदमाम्नायते। जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपांशुयाजमं
तरा यजति विष्णुरुपांशुयष्टव्यो जामित्वाय प्रजापतिरुपांशुयष्टव्यो जामित्वाय अग्नीषोमावुपां
शुयष्टव्यावजामित्वायेति। तत्र विष्ण्वादिवाक्येषु विहितस्य यागत्रयसमुदायस्यानुवाद इति चे
न्मैवं। आग्नेयाग्नीषोमीयपुरोडाशद्वयनैरंतर्यकृतस्य जामित्वदोषस्य वाक्योपक्रमे उपन्यासा
त्पुरोडाशयोरंतराले किंचिद्विधित्सितं न ह्यंतरालगुणविशिष्टं विधेयं विष्ण्वादिवाक्येषु प्रतीयते
एवं वाक्ये तु तत्प्रतीयत इति विधायकं तद्वाक्यं। न चात्र यजतीति वर्तमानापदेशः शंकनीयः
पंचमलकारस्याश्रयणात्। अंतरालकालवदुपांशुत्वगुणत्वस्यापि विशेषणत्वात्तद्विशिष्ट
कर्मण उपांशुयाजनामकत्वं सत्येवं गुणद्वयविशिष्टे कर्मणि आद्येन वाक्येन विहिते विष्ण्वा
दिवाक्यत्रयमर्थवादः स्यान्न चात्र विहितयागानुवादेन दैवतादिविधिः शंकनीयः समाधातव्ये

नजामित्वदोषेणोपक्रमादजामित्वेन समाधानेनोपसंहाराच्च जामिवा इत्यादेरजामितायेत्वं तस्य
सर्वस्य महावाक्यस्यैकत्वप्रतीतेः। न खल्वेकस्मिन् वाक्ये विधेयबाहुल्यं संभवति न चात्र वि
धित्सितस्योपांशुयाजस्य द्रव्याभावः। ध्रौवस्य तद्द्रव्यत्वात् नापि देवताया अभावः। नानाशा
खास्वुपांशुयाजक्रमपठितैर्वैष्णवप्राजापत्याग्नीषोमीयमन्त्रैर्विकल्पेन देवतात्रयस्य प्र
तीयमानत्वात् तस्मादाघजनीत्येतद्विधायकं॥ पंचमाधि०॥ अग्निहोत्राघारवाक्यमनुवा
दोथवा विधिः। अरूपत्वान्नुद्दुध्युर्द्ध्ववाक्येनोक्तमनूद्यते। गुणप्रसिद्धौ न दध्यादिगुणो दुष्टवि
शिष्टता। रूपं दध्यादिमं[illegible]त्राभ्याम् अतो सो गुणेनो विधिः। इदमाम्नायते। अग्निहोत्रं जुहोति द
ध्ना जुहोति पयसा जुहोतीति च। इदमपरमाम्नायते। आघारमाघारयति ऊर्ध्वमाघारयति
ऋजुमाघारयतीति च। तत्राग्निहोत्रवाक्यं दध्यादिवाक्यविहितस्य कर्मसमुदायस्यानुवा

23

दः। आघारवाक्यं चोर्ध्वादिवाक्यविहितस्य। नत्वेतद्वाक्यद्वयं कर्मविधायकं कुतः। द्रव्यदेवता
लक्षणस्य यागरूपस्याभावादिति चेन्न तत्र वक्तव्यं। किं दध्यादिवाक्येन गुणमात्रं विधीयते किं
वा गुणविशिष्टं कर्म। नाद्यः अग्निहोत्रादिवाक्यस्य तन्मते कर्मविधायकत्वाभावेन गुण
नः कस्यचिदसिद्धौ गुणस्यानुवादपुरःसरस्य गुणमात्रविधानस्यासंभवात्। द्वितीये विधिगौ
रवं स्यात् तच्च सत्यां गतावयुक्तं। अतोऽग्निहोत्रादिवाक्यं कर्मविधायकं तत्र द्रव्यं दध्यादिवा
क्यैर्लभ्यते देवता मांत्रवर्णिकी। आघारेप्येवं विधौ द्रव्यदेवते उन्नेतव्ये॥ षष्ठाधिकरणं॥
यजत्यालभती सन्नावनुवादौ विधी उत। गृह्णात्यवद्यतीत्याभ्यां विहितेर्थेनुवादिनौ। नानु
वादौ पुरोवादे यज्यालभ्योरतो विधिः। ग्रहणं सोमसंस्कारोवदाने पशुसंस्क्रिया। सोमेन
यजेतेति श्रूयते। तत्रैंद्रवायवं गृह्णाति मैत्रावरुणं गृह्णातीत्यादीन्यपि श्रुतानि। एवमग्नी

सोमीयं पशुमालभेतेति श्रूयते। तत्र हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यादीन्यपि श्रुतानि त
त्रैन्द्रवायववादिवाक्यैर्यागा विधीयन्ते इन्द्रवाय्वादिप्रातिपदिकैर्देवतानां तद्धितप्रत्ययेन सोमरसद्रव्य
स्य च प्रतीयमानत्वात् एतेषां ग्रहणवाक्यविहितानां यागानां समुदायः सोमेन यजेतेत्यनेनानू
द्यते। अवदानवाक्येषु हृदयादिद्रव्यं श्रुतं ततो द्रव्यविशिष्टा यागा विधीयन्ते तदनुवादेनाग्नीषो
मरूपा देवता पश्वालम्भवाक्ये विधीयते तस्मादवदानवाक्यविहितानां यागानां समुदायः पशु
मालभेतेत्यनेनानूद्यते इति प्राप्तो ब्रूमः। सति हि पुरोवादेऽनुवादो भवति नापि तद्धितप्रत्ययोक्तो
रसः सोमलता न च तद्धितप्रत्ययः सर्वनामार्थे विहितः प्रकृतं ब्रूते न तु रसमिति शंकनीयं यथा
र यागह्लातीति रसस्यैव प्रकृतत्वात्। तथा पशुमालभेतेत्यनेन प्रतीतो यो नावदानवाक्येषु प्र
तीयते ततः पुरोवादाभावेऽनुवादासंभवाद्यजत्यालभतिभ्यां कर्मणी विधीयेते ग्रहणवाक्येषु रे

भ=न चात्र पुरो[illegible]वादोऽस्ति। सोमेन यजेतेत्यनेन प्रतीतस्यार्थ
स्य ग्रहणवाक्ये[illegible]प्रसक्तीतेः। न हि ग्रहणं यजनं भवति।।

वता विशिष्टः सोमसंस्कारो विधीयते। अवदानवाक्यैश्च पशुसंस्कारः॥ सप्तमाधि०॥ आहु
तीस्तिस्र इत्यत्र कर्मैक्यमुत भिन्नता। एकत्वं सकृदाख्यातात् संख्यावृत्त्या प्रयाजवत्। आख्या
तमात्रं नो मानं संख्यया बहुकर्मता। आवृत्त्यैकादशत्वं तु प्रयाजे गत्यभावतः। पशून् सप्त
दश प्राजापत्यानित्यत्र भाष्यकृत्। विचारमाह पूर्ववत् क्रियात्रित्वस्फुटत्वतः। बहुत्वोपेतप
शुभिर्दैवयोगादभिन्नता। रूपस्यैतेन कर्मैक्यं संख्या नात्र क्रियांगता। देवतासंगतस्यैव तद्
धितार्थस्य पश्चिमः॥ बहुत्वसंगमो रूपसंख्यया तः क्रियाभिदा। तिस्र आहुतीर्जुहोतीति
श्रूयते। तत्र जुहोतीत्येतदाख्यातं समिधो यजतीत्यादिवन्नाभ्यस्तं किंतु सकृदेवाम्नातं त
त एकमिदं कर्म त्रित्वसंख्या तु तस्यैव कर्मण आवृत्त्या नेतव्या। यथा प्रयाजेष्वेकादशत्वसं
ख्या पंचानामेव प्रयाजानामावृत्त्या नीता तद्वदिति प्राप्ते ब्रूमः। किमिदमाख्यातं पदांतरनि

24

राम
२४

रपेक्ष्यमेव। कर्मैक्ये प्रमाणमुतपदांतरान्वितं। नाद्यः। वाक्यांशस्य पदमात्रस्य प्रमितिजनक
त्वाभावात्। द्वितीये त्रित्वसंख्यया विशेषितेनाख्यातेन कर्मवहुत्वं गम्यते। प्रयाजानां तु पूर्व
मेव पंचसंख्यावरुद्धत्वादावृत्तिमंतरेणैकादशत्वं दुःसंपादं इहत्वे तद्विधितः पूर्वं कर्मण ए
कत्वसंख्यावरोधो नास्तीति वैषम्यं तदेतद्वृत्तिकारोदाहरणं भाष्यकारो नानुमन्यते कर्मवा
चिनश्चाहुतिशब्दस्य विशेषणेन त्रिशब्देन कर्मवहुत्वस्य स्फुटतया पूर्वपक्षानुत्थानात्॥
इदं त्वत्रोदाहरणं। सप्तदशप्राजापत्यान्पशूनालभेत इति। अत्र प्रजापतिर्देवता एषां प
शूनां ते प्राजापत्या इति तद्धितव्युत्पत्तौ वहुत्वोपेताः पशव एकं द्रव्यं ततो द्रव्यैक्यादेवतैक्या
च्च यागस्य रूपमभिन्नमित्येकमिदं कर्म यातु सप्तदशेति संख्या सा पशुद्रव्यगता न तु पूर्वो
दाहृतत्रित्वसंख्येव क्रियागता तस्मान्न कर्मभेदमापादयतीति प्राप्ते ब्रूमः। अत्र प्रजापति

भा.प.

दैवत्यायस्य पशोः स प्राजापत्य इति तद्धितान्तं प्रातिपदिकं श्रुत्वा पश्चात्तद्धितान्तप्रातिपदिकार्थ
स्य प्रजापतिदेवताविशिष्टस्य पशोः कर्मबहुत्वविवक्षायां उत्पन्ने इमे द्वितीयाविभक्तिबहु
वचने तत्र प्रथमभाविन्या द्वितीयाविभक्तेर्देवतावत्तद्धितोत्पत्तिवेलायामन्वयो नास्ति कु
तः पश्चाद्भाविनो बहुवचनस्यान्वयः । एवं सति प्राजापत्येत्यनेन तद्धितान्तप्रातिपदिकेने
कं पशुद्रव्यमेकदेवतोपेतं यागस्वरूपं समर्प्यते । तादृशानां रूपाणां बहुत्वाय बहुवचनं
बहुत्वविशेषः सप्तदशेति निर्दिश्यते । तस्मादत्र संख्यया कर्मभेदः । एवं सत्यष्टमे वक्ष्य
माणं सप्तदशपशूनामेकादशिनपशुगणविकृतित्वमुपपद्यते ॥ अष्टमाधिकरणं ॥
अथैष ज्योतिरित्यत्र गुणो वा कर्म वा पृथक् । गुणः सहस्रदानात्मा ज्योतिष्टोमे ह्यनूदिते ।
अथेति प्रकृतेच्छिन्न एतच्छब्दोऽग्रगं वदेत् । संख्यया वान्यकर्मत्वमिह नूतनसंज्ञया ॥ अथै

राम

षज्योतिरथैषविश्वज्योतिरित्यनूद्यतस्मिन्सहस्रदानलक्षणोगुणोविधीयतेइतिचेन्न।
प्रकृतस्यज्योतिष्टोमस्य×रथैषसर्वज्योतिरेतेनसहस्रदक्षिणेनयजेतेतिश्रूयते।अत्रप्रकृ
तंज्योतिष्टोममेषज्योति[illegible]×१ स्यापेत्यनेनशब्देनविछिन्नत्वात्।नचैवंसत्यथै
षज्योतिरित्यनेनएतच्छब्देनुपपन्नइतिवाच्यं।संनिहितवाचिनैतच्छब्देनातीतसंनिहि
तस्येवागामिसंनिहितस्यापिपरामर्शसंभवात्आगामिसंनिहितस्यज्योतिःशब्दार्थः
सचज्योतिःशब्दोनीतमपरामर्शान्नपूर्वसंज्ञारूपत्वान्नूतनंकिंचित्कर्माभिधत्तेततो
यथापूर्वत्रसंख्यायाकर्मभेदस्तथात्रापिसंज्ञयाकर्मभिद्यतेविश्वज्योतिःसर्वज्योतिः
शब्दयोरप्ययंन्यायोद्रष्टव्यः।नवमाधिकरणमारचयति।गुणःकर्मांतरंवास्याद्दा
क्षिभ्यावाजिनंत्विति।गुणादेवाननुघोक्तसमुच्चयविकल्पतः।आमिक्षोत्पत्तिशिष्टत्वा

त्प्रबलात्तत्र वाजिनं॥ गुणोऽप्रविद्यपकर्मान्यत्वकल्पयेत् वाजिदेवकं॥ तप्ते पयसि दध्यानयति
सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते घनीभूतः पिंड आमिक्षा। जलं वाजिनं॥
तत्रामिक्षाद्रव्यभाजो विश्वेदेवा उक्ताः ते वाजिभ्य इत्यनेनानूद्य ते वाजिनो नामामिक्षारूपमे
वामस्तीति तन्निष्पत्तेः। तानन्द्य वाजिनद्रव्यरूपो गुणो विधीयते। तच्च द्रव्यमामिक्षाद्रव्ये
ण समुच्चीयतां विकल्प्यतामिति प्राप्ते ब्रूमः। उत्पत्तिशिष्टेनामिक्षाद्रव्येणावरुद्धे वैश्वदेवया
गे वाजिनद्रव्यस्योत्पन्नशिष्टस्य प्रवेशाभावाद्वाजिनं वाजिशब्दार्थस्य देवांतरतामापादय
ति। ततो द्रव्यदेवतालक्षणस्य रूपस्य भिन्नत्वात्कर्मांतरं॥ दशमाधिकरणमारचयति॥
दध्ना होमेऽन्यकर्मत्वं गुणो वान्यत्तु पूर्ववत्॥ निर्गुणत्वादग्निहोत्रे युक्तो दध्यादिको गुणः॥ दध्ना
जुहोतीति श्रूयते तत्राग्निहोत्रं जुहोतीत्यतस्मात्प्रकृतात्कर्मणोऽन्यद्दधिहोमरूपं कर्मेति प्र

राम
२६

26

वैन्यायेनावगम्यते। यथा पूर्वत्र वाजिनद्रव्येण कर्माभिधीयते तथा दधिद्रव्येणेति चेन्न। वैषम्यात्॥
यथा वैदेवो यागः आमिक्षागुणाविकृतः तथाग्निहोत्रं न रागुणान्तराविकृतं प्रत्युत निर्गुणतया गुणमाकां
क्षतीति तस्मादयं गुणविधिः। एवं पयसा जुहोतीत्यादिष्युदाहर्त्तव्यं। पयोदध्यादीनां सर्वेषामुत्पन्नाशि
ष्टतया समबलत्वादेकैकेन द्रव्येणाग्निहोत्रनिष्पत्तेश्च व्रीहियववद्विकल्पः॥ एकादशाधिकर.
यद्दध्नेन्द्रियकामस्य जुहुयादिति तत्र पक्ष॥ गुणो वाभिधीयते कर्म धात्वर्थस्य फलित्वतः॥ मत्वर्थगौ
रवादिभ्यो नान्यत्कर्मफलाय तु॥ गुणविधेयं धात्वर्थो विहितत्वादनूद्यते॥२॥ दध्नेन्द्रियकाम
स्य जुहुयादिति श्रूयते तदिदं प्रकृतादग्निहोत्रादन्यत्कर्म न तत्र गुणविधिः। कुतः। इन्द्रियका
मस्येति तु तत्फलस्य धात्वर्थमन्तरेण द्रव्यमात्रादनिष्पत्तेरिति चेत् मैवं कर्मान्तरविधौ दधि
मता होमेनेन्द्रियं भावयेदिति मत्वर्थलक्षणा गुणविशिष्टक्रियाविधौ गौरवात् प्रकृतहोमानुप्र

27

कृतप्रक्रियाप्रसंगाद्गुणमात्रं तु फलाय विधीयते यद्यपि दध्ना जुहोतीति दधिप्राप्तं तथापि फ
लसंबंधो न प्राप्तः। धात्वर्थाभावे फलासंभवादिति चेन्न। अग्निहोत्रं जुहोतीति विहितस्य धात्वर्थ
स्यानूद्यमानत्वात्॥ द्वादशाधिकरणं॥ उक्थाग्निष्टुतमेतस्य वारवंतीयसाम हि। रेवती
षु कृत्वेति श्रुतं पशुफलाश्रये। रेवत्यादिर्गुणः कर्म पृथग्वा पूर्ववद्गुणः॥ रेवतीवारवंतीय
संबंधात्स्यः पशुप्रदः॥ साम्नोत्र फलकर्मभ्यां संबंधे वाक्यभिन्नता। तेनोक्तागुणसंयुक्तं मन्य
त्कर्मोच्यते फले॥ त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्र
ह्मवर्चसकामो यजेतेत्येतस्य संनिधौ श्रूयते एतस्यैव रेवतीषु वारवंतीयमग्निष्टोमसाम कृ
त्वा पशुकामो ह्येतेन यजेतेति अस्यायमर्थः। अग्निष्टोमस्य विकृतिरूपः कश्चिदग्निष्टुन्नाम
कः। स च पप्रस्तोत्रे त्रिवृत्स्तोमयुक्तत्वात्त्रिवृदित्युच्यते। अग्निष्टोमोक्थ्यादीनां संस्थानां सोम

संस्थानांमध्येग्निष्टोमसंस्थारूपत्वादग्निष्टोमइत्युच्यते।तच्चप्रकृतेतृतीयसवनेआर्भवपवमा
नस्योपरियज्ञायज्ञीयंसामगीयतेतेनचसाम्नाऽग्निष्टोमयागस्यसमाप्यमानत्वादग्निष्टोमसं
मेत्युच्यते।तच्चप्रकृतौयज्ञायज्ञावोअग्नयइत्याद्यग्नेयीष्वृक्षुगीयतेअस्मिंस्त्वग्निष्टुतिब्रह्म
वर्चसकामेनवायव्यास्वृक्षुतत्सामगातव्यंतच्चप्रकृताविवेकविंशस्तोमयुक्तंपशुकामस्यतु
रेवतीर्नःसधमादइत्यादिषुरेवतीष्वृक्षुवारवंतीयंसामगायेदितितत्ररेवतीनामृचांवारवं
तीयनामकेनसाम्नायःसंबंधःसोयंपशुफलायाग्निष्टुतिविधीयतेएतस्यैवेतिप्रकृतपरामर्श
केनैतच्छब्देनान्यव्यावर्त्तकेनैवकारेणचाग्निष्टुतःसमर्प्यमाणत्वात्।यथापूर्वाधिकरणेइंद्रिय
फलायप्रकृतेग्निहोत्रेदधिगुणोविहितस्तद्वदितिप्राप्तेब्रूमः।विषमोदृष्टांतः।दध्नोहोमजनक
त्वंनशास्त्रेणबोधनीयंतस्यलोकतोवगंतुंशक्यत्वात्।फलसंबंधएकएवशास्त्रबोध्यइतिनतत्र

28

वाक्यभेदः। इहतुरेवत्यगाधारकवारवंतीयस्तान्नोग्निष्टुत्कर्मसाधनत्वं फलसाधनत्वं चेत्युभ
यस्यशास्त्रैकबोध्यत्वा दुर्वारोवाक्यभेदस्तेनपशुफलकैयथोक्तगुणविशिष्टं कर्मांतरमत्रवि
धीयते। एतछद्ध एवकारस्यविधीयमानकर्मांतरविषयतयायोजनीयो॥ अत्रयोदशाद
वृष्ट्यन्नस्वर्गकामानांसोभरंस्तोत्रमीरितं। निधनान्यपिहीषऊर्गितिवृष्ट्यादिकामिनां॥ फ
लांतरंकिंवृष्ट्यादिहीषादीनामतोदिते॥ सोभरेफलत्वंभिन्नेनिधनंविनियम्यते। फला
नरंचतुर्थ्योक्तंवृष्टिकामायहीषिति॥ सोभरस्यफलंवृष्टिहीषित्युक्त्याविवर्द्धते। नोक्तार
ष्ट्यन्नकामानामन्यत्वंप्रत्यभिज्ञया। नियमेपिचतुर्थ्येषातादर्थ्यादुपपद्यते। योवृष्टिका
मोयोन्नाद्यकामोयःस्वर्गकामःससोभरेणस्तुवीत। सर्वेवैकामाःसोभरइतिसमाम्नायपु
नःसमाम्नातंहीषितिवृष्टिकामायनिधनंकुर्यादूर्गित्यन्नाद्यकामायऊइतिस्वर्गकामायेति

राम

सोभरं नाम साम विशेषः। निधनं नाम पंचभिः सप्तभिर्वा भागै रूपेतस्य साम्नोऽन्तिमो भागस्तस्मिन्नि
धने हीषादयो विशेषः सोभरसाम साध्यस्तोत्रफलेभ्यो वृष्ट्यादिभ्योऽन्यानि वृष्ट्यादिफलानि जनयि
तुं विधीयते कुतः। हीषादिविधिवाक्ये वृष्टिकामा येत्यादिना चतुर्थीश्रवणात्। तादर्थ्यं शेषत्वं ग
मयति तच्छेषत्वं च पुरुषाभिलषितफलसाधनत्वे सत्युपपद्यते ततः सोभरस्य हीषितनिध
नविशेषस्य च फलभेदे दृष्टी भवतः। तदुभयमेतन्नान्महतीवृष्टिरिति प्राप्ते ब्रूमः। सोभरवि
धौ यो वृष्ट्यादिकामः स एव हीषादिविधौ प्रत्यभिज्ञायते ततः सोभरस्य फलभूता य वृष्ट्यादय
स्त एव हीषादिवाक्येनूद्यंत इति फलांतरं। अथोच्यते। न तत्र फलांतराभावाद्धीषादीनां च नाना
शाखाध्ययनादेव सोभरे प्राप्तत्वादनर्थकोऽयं विधिरिति। तन्न। फलत्रयकामानां त्रयाणां अ
प्रतियमेनैव हीषादिषु मध्ये यस्य कस्यचिन्निधनस्य प्राप्तौ विधेर्नियमार्थत्वात्। तादर्थ्यं तु

फलांतराभावेपिसौभरवाक्योक्तवृष्ट्यादिफलसाधने सौभरे हीषादीनां नियमस्यमानत्वादु
पपद्यते तस्मादयं निधनविशेषनियमो न विधिः॥ इति माधवीये जैमिनीयन्यायमालावि
स्तरे द्वितीयाध्यायस्य द्वितीयः॥ तृतीयापादस्य प्रथमाधिकरणमारचयति॥ रथंत
रंसाम सोमे भवेत्तद्बृहज्जगत्॥ ऐंद्रवायवशुक्राग्रयणग्राह्यग्रहाः श्रुताः॥ रथंतरादि
संयुक्तमन्यत्सोमीथवा गुणः॥ गायत्र्यादियुतात्पूर्वादन्यथा वृत्तितो गुणैः॥ सोमशब्दः प्रक
रणे ज्योतिष्टोमसमर्पकः॥ ग्रहायत्तं गुणस्तत्र व्यावृत्तिस्तु परस्परं। ज्योतिष्टोमप्रकरणे श्रू
यते। यदि रथंतरसामा सोमः स्यादैंद्रवायवाग्रान् ग्रहान् गृह्णीयात्। यदि बृहत्सामा शुक्रा
ग्रान् यदि जगत्सामाग्रयणाग्रानिति सोमशब्देन सोमतोलेसाधनको यागोभिधीयते। तस्मिं
श्च यागे माध्यंदिने सवने पृष्ठस्तोत्रे रथंतरबृहज्जगन्नामकानि सामानि विकल्पेन विहिता

नि अभित्वाशूरेत्येतस्यांयोनावुत्पन्नंरथंतरं।त्वामिद्धिहवामहइत्येतस्यामुत्पन्नंबृहत्।ज
गतीछंदस्कायामच्युतत्पन्नंजगत्। ऐंद्रवायवमैत्रावरुणआश्विनःशुक्रोमंथ्याग्रयणउक्थ्यो
ध्रुवइत्यादिनामकाग्रहाःप्रातःसवनेगृह्यंतेदारुपात्रेषुसोमरसस्यग्रहणंतद्ग्रहाणांभवं
तिसोमयागस्यरथंतरंसामोपेतत्वमपेक्ष्यतेषुग्रहेषुऐंद्रवायवःप्रथमंग्रहीतव्यःबृहत्सामोपे
तत्वपक्षेशुक्रःजगत्सामोपेतत्वपक्षेआग्रयणःप्राथमिकइतिविषयवाक्यस्यार्थः।तत्रप्रकृतौ
ज्योतिष्टोमोगायत्र्यादिसामोपेतस्तत्रावरत्यर्थमिहरथंतरादयोगुणाःकीर्त्यंतेतस्मादैंद्रवाय
वाग्रयणत्वादिगुणोपेतानिकर्मांतराण्यत्रविधीयंतइतिप्राप्तेब्रूमः।यदिरथंतरसामासोमः
स्यादित्युक्तोयःसोमशब्दस्तेनप्रकरणेनचात्रज्योतिष्टोमःसमर्प्यतेसमर्पितेतस्मिंस्तद्यथोक्त
ग्रहाग्रत्वंगुणोविधीयते।नचरथंतरादिगुणानुवादेनज्योतिष्टोमस्यव्यावृत्तिःसंभवतितस्यप्रा

तःसवनार्तौगायत्र्यादिसामोपेतत्वेपि पृष्ठस्तोत्रे रथंतरादियोगस्यापि सद्भावात्। किं तर्हि व्याव
र्त्यमिति चेत्। रथंतरबृहज्जगतां परस्परव्यावृत्तिरिति ब्रूमः। रथंतरादयः पृष्ठस्तोत्रे विक
ल्पितास्तत्र रथंतरानुवादेनेतरौ पक्षौ व्यावर्त्येते। एवमितरत्रापि। तस्माद्गुणविधिः। ननु यः
प्रकृतो ज्योतिष्टोमः सोन्येषां सोमयागानां प्रकृतिः। न हि प्रकृतौ जगत्यामुत्पन्नं साम विहितम
स्ति। अत एव दशमाध्याये पंचमपादस्य पंचदशाधिकरणे प्रथमवर्णके यदि जगत्सामेति
वाक्योक्तमाग्रायणाग्रत्वं विकृतौ त्रिवृन्नामके मुख्येहनि व्यवस्थापितं। बाढं। तथापि नात्र
कश्चिद्विरोधः। आग्रयणाग्रत्ववाक्येन कर्मांतरविधायकं किंत्वन्येन विहिते सोमयागे यत्र
जगत्साम संभवति तत्र गुणविधायकमित्येतादेवात्र प्रतिपाद्यत्वात्॥ द्वितीयाधिकरणं॥
राजसूयप्रकृतेष्टिरवेष्टाख्या श्रुता तत्र। विप्रक्षत्रियविड्भेदाद्धविषां व्यत्ययः क्रमे॥ विप्रा राम राम राम

देरनुवादः स्यात् प्रापणं वानुवादगीः॥ व्यत्ययाय त्रयाणां च राजत्वात् प्राप्तिरस्ति हि। न राज्ययो
गाद्राजत्वं क्षत्रियत्वं तु तत्त्वतः॥ अप्राप्तप्रापणं तस्मान्नरथंतरं तु व्येता। राजसूयप्रकरणे का
श्चिदिष्टिरवेष्टिनामिकाम्नायते॥ आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा। ऐंद्रमेकादशा
कपालमृषभो दक्षिणा। वैश्वदेवं चरुं पिशंगी पष्ठौहि दक्षिणा। मैत्रावरुणीमामिक्षां वशा दक्षिणा
बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणेति। तस्यामवेष्टौ हविषां क्रमव्यत्ययः श्रूयते। यदि ब्राह्मणो
यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेद्यदि राजन्य ऐंद्रं यदि वैश्यो वै
श्वदेवमिति तत्र यथापूर्वाधिकरणे ऐंद्रवायववाग्रत्वं व्यवस्थापयितुं यदिशब्दयुक्तेन वाक्ये
न रथंतरं निमित्तत्वेनानूदितं। एवमत्रापि पंचमस्थाने श्रूयमाणं बार्हस्पत्यचरुं मध्ये तृतीय
स्थाने स्थापयितुं यदि ब्राह्मण इत्येतन्निमित्तत्वेनानूद्यते। द्वितीयस्थाने तु तस्यैंद्रस्य तृतीयस्था

नैवस्थापयितुं यदि राजन्य इत्यनुवादः। वैश्वदेवस्य तु स्वत एव तत्तीयस्थाने श्रवणात्तत्रमध्येवि
धानविधिर्नित्यानुवादः। ननु राजकर्तृके राजसूये ब्राह्मणवैश्ययोः प्राप्त्यभावान्नानुवादोयु
क्त इति चेत्। न। तयोरपि राज्ययोगहेतुराजशब्दार्थत्वादिति प्राप्तेभ्रमः। राजशब्दः क्षत्रियजा
तौ रूढो न तु राज्ययोगस्तस्य प्रवृत्तिनिमित्तं प्रत्युत राज्यशब्दस्य राजयोगः प्रवृत्तिनिमित्तं राज्ञः
कर्मेति विग्रहस्य राजप्रातिपदिकस्योपरि प्रत्ययस्य विशेषविधानात्। ब्राह्मणवैश्ययोः प्रजापाल
नेन राज्यशब्द उपचरितः। तस्मादवैश्यौ ब्राह्मणवैश्यौ पूर्वमप्राप्तावनेन वचनेन प्राप्येते। न
नु राजसूयस्य राजकर्तृकत्वात्तदन्तर्गतायामवेष्टेरपि तथात्वात्तस्यां ब्राह्मणवैश्ययोः प्राप
णमयुक्तमिति चेत् मैवं। अन्तरवेष्टौ तदसंभवेपि राजसूयाद्बहिः प्रयुज्यमानायामवेष्टौ तत्सं
भवात्। तस्मादत्र ब्राह्मणादिकर्तृकं यथोक्तं गुणविशिष्टं कर्मान्तरं विधीयते इति न रथन्तरादि तु

31

स्यत्वं। यदि शब्दस्तु निपातत्वादनर्थकोऽर्थान्तरवाची वेत्युक्तेयं॥ तृतीयाधिकरणमारचयति॥ ॥
वसंते विप्र आदध्यात्तत्रैवोपनयीत तं। अनुवादः प्रापणं वानुवादः कालसिद्धये॥ अंतरेणाग्निवि
द्याभ्यां कर्मानुष्ठित्यसंभवात्। लुप्ते आधानोपनीती प्राप्ता विप्रादयस्ततः॥ लौकिकाग्नेः पुस्तका
च्चतत्सिद्धेर्नास्ति कल्पनं॥ कालविप्रादिसंयुक्तमतोऽप्राप्तं विधीयते॥ ३॥ वसंते ब्राह्मणोऽग्निमा
दधीत। ग्रीष्मे राजन्यः शरदि वैश्य इति श्रूयते। वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वै
श्यमिति च। तत्र वसंतादिकालविशेषं विधातुं ब्राह्मणादयोऽनूद्यंते। न च तेषां प्राप्त्यभावः। कृतानु
ष्ठानान्यथानुपपत्त्या कॢप्तत्वात्। न ह्याहुत्याधारमंतमग्निमनुष्ठानप्रकारज्ञापिकां विद्यां च विना
कर्मानुष्ठानं संभवति। अग्निश्चानाधानमंतरेणास्तीति ब्राह्मणादिकर्तृकमाधानं कल्पयति। वि
द्या चोपनयनपूर्वकाध्ययनमंतरेणासंभवंती ब्राह्मणमुपनयनं कल्पयतीति तत्र प्राप्तिरिति चेत्।

मेवं। लौकिकाग्नौ हेतुं पुस्तकपाठेनाधिगंतुं च शक्यत्वेनाधानोपनयनयोरकल्पने ब्राह्मणादी
नामप्राप्तेः। तस्माद्वसंतादिकालविशिष्टब्राह्मणादिकर्तृके आधानोपनयने अत्र विधीयेते
चतुर्थाधिकरणं॥ यदाक्षायणयज्ञेन स्वर्गकामो यजेतेतत्। कर्मांतरं गुणो वोक्तदर्शादौ फल
सिद्धये॥ गुणस्याप्रसिद्धत्वात्कर्मभेदोऽत्र संज्ञया॥ गुणे व्युत्पत्तिशेषाभ्यामावृत्त्याख्यो न ना
मतत्। दर्शपौर्णमासप्रकरणे श्रूयते। दाक्षायणयज्ञेन स्वर्गकामो यजेतेति। तत्र दाक्षायणश
ब्दवाच्यस्य कस्यचिद्गुणस्य लोकेऽप्रसिद्ध्यभावादुद्भिदादिवद्यजिसामानाधिकरण्येन कर्मना
मत्वाद्वैषज्योतिरित्यादिवदपूर्वसंज्ञायां कर्मांतरविधिरिति चेन्न। दाक्षायणशब्दस्यावृत्तिवा
चकत्वान्नच्छब्दनिर्वचनाद्वाक्यशेषाद्वागम्यते। तथाहि अयनमित्यावृत्तिरुच्यते। दक्षस्येमे दा
क्षास्तेषामयनमिति तन्निर्वचनं। दक्ष उत्साही पुनःपुनरावृत्तावनलसस्तत्स्पर्धः। तदीयानां प्रयो

पाम
३२

32

गानांमावृत्तिर्दीक्षायणशब्दार्थः। तथाचात्र त्यायुक्तः। प्रकृतो दर्शपूर्णमासात्मकोयस्तो दाक्षायणयज्ञः। आवृत्तिप्रकारस्तु द्वे पौर्णमास्यौ यजेत द्वे अमावास्ये इत्यादि वाक्यशेषादवगम्यते ततो दध्यादिवत् प्रसिद्धार्थत्वाद्दर्शपूर्णमासयोः प्रकृतयोरयं स्वर्गफलसिध्यर्थमावृत्त्याख्य गुणविधिः। नत्वग्निहोत्रादिवत्कर्मनामधेयं। एवं साकंप्रस्थाय्येन यजेत पशुकाम इत्यत्रापि द्रष्टव्यं। अमावास्यायागे द्वौ द्वौ दोहौ संपाद्य च तस्य दधिपयसोः कुंभीनां सह प्रस्थापनं साकं प्रस्थाप्यं। तद्युक्तो दर्शयागः साकंप्रस्थायीयः तथासति प्रकृते दर्शयागे पशुफलाय साकं प्रस्थाप्याख्यो गुणो विधीयते॥ पंचमाधिकरणमारचयति॥ वायव्यः श्वेत आलभ्यो भूत्यै सो यं चरुस्तथा॥ निर्वपेद्ब्रह्मतेजोर्थमीषामुष्टिनिरूप्ययोः॥ गुणो श्वेतचरू किं वा यागावतकर्मणि॥ फलार्थे अपवायागो विशिष्टो विहितावि ह। श्वेतस्य वायुसम्बन्धी यागमाग्नेय चरविप्र

ये। चतुर्गुणश्चरुः स्थाली निर्वापस्तु तदाश्रितः। फलहानेर्न तत् किंतु यावच्चोदितकर्म तत्॥ द्
व्यादिरूपसंपत्तेरवार्यो यागतार्थकी॥ अनारभ्येदमाम्नायते। वायव्यं श्वेतमालभेतेति। च
तुरो मुष्टीन्निर्वपतीति च। ईषा शाकटगतो लांगलदंडवद्दीर्घः काष्ठविशेषः। तस्या आलंभः
स्पर्शः। तमेतं पूर्णमासगतमीषालंभमनूद्य तस्यामालभ्यायामीषायां श्वेतत्वं गुणो विधी
यते। तस्य च श्वेतकाष्ठस्य वायुना स्पृश्यमानत्वाद्वायव्यता संभवति। तथा चतुर्मुष्टिनिर्वप
नमनूद्य चतुर्गुणत्वेन विधीयते। चरुः स्थाली सा च निर्वापस्याश्रयः। निरुप्तस्य हविषस्था
नेयतया सूर्यवत्प्रभासंबंधात्सौर्यत्वं भूति ब्रह्मवर्चसफले च सार्वकामिकयोर्दर्शपूर्णमा
सयोः पूर्वसिद्ध एवानूद्येते। तस्माद्गुणविधी इत्येकः पूर्वपक्षः। न हि फलपदयोर्नित्यवच्छ्रु
तयोः संभवत्प्रयोजनयोरप्राप्तिकानुवादत्वमानर्थक्यं वा युक्तं। तस्माद्गुणफलविधिरे

राम

कर्मांतरे विधीयेते। तदापि यागस्याश्रवणादालंभनिर्वापयोरेव श्रवणात् यावदुक्तकर्मविधिरि
ति द्वितीयः पूर्वपक्षः। श्वेतपशुचरुद्रव्ययोर्वायुसूर्यदेवतयोश्चास्पष्टं प्रतीयमानतया रूपवतो
र्यागयोरार्थिकयोर्वारयितुमशक्यत्वाद् द्रव्यदेवताविशिष्टयोर्यागयोर्विधिरभ्युपगंतव्यः। भू
तिकामो वायव्येन श्वेतेन पशुना यजेत ब्रह्मवर्चसकामः सौर्येण चरुणा यजेतेत्येवं विधो
र्थसिद्धो विधिः। द्रव्यदेवतासंबंधकल्पितस्य यागस्य लिङ्प्रत्ययेन कर्त्तव्यता विधावालंभनि
र्वापयोर्थात् र्थयोः का गतिरिति चेत्। अनुवाद इति ब्रूमः। तत्प्राप्तिस्त्वार्थिकी। निर्वापालंभा
वंतरेण तत्तद्यागासिद्धेः। तस्माद्यागविधिरिति राद्धांतः॥ षष्ठाधिकरणमा॰॥ वत्सालंभो
यजिः स्पर्शो वायव्यालंभवद्यजिः। स्पर्शः स्याद्धवराहित्यात्संस्कारः प्रापपाठतः॥ अग्निहो
त्रदोहाधिकारे श्रूयते। वत्समालभेतेति तत्र विमतो वत्सालंभो यजिः स्यात् प्राणिद्रव्यकाल

मत्वात्। वायव्यालंभवदिति चेन्न। देवतारहितत्वेन तद्वैषम्यात्। किं चायं वत्सालंभोऽग्निहोत्रांग
संस्कारः तत्प्रायेपठितत्वादितरसंस्कारवत्तस्मादयं स्पर्शमात्रविधिः॥ सप्तमाधिकरणमा॰
चरुर्भवति नैवारउपधत्ते चरुं त्विति॥ यागः स्यादुपधानं वा यागः शेषोक्तदैवतः॥ यागत्वा
निश्चये शेषो नापेक्ष्यो नो यजिः कुतः॥ किंतूपधानमात्रत्वं यावदुक्तं चरोस्थितं॥ अत्रोच्य
ते॥ नैवारश्चरुर्भवतीति चरुमुपदधातीति च। तत्र नीवारचरुद्रव्यको यागो विधीयते। न
चात्र देवताया अभावः। बृहस्पतेर्वा एतदन्नं पत्नीवारा इति वाक्यशेषेण देवतासिद्धेः। उ
पधानं तु यागोपयुक्तस्य प्रतिपत्तिः स्विष्टकृदादिवदिति प्राप्ते ब्रूमः। यागविधौ निश्चिते स
ति पश्चाद्देवतायामपेक्षितायां वाक्यशेषबलाद्देवताक्लृप्तिः। इह तु देवताकल्पनेन यागवि
धित्वनिश्चय इत्यन्योन्याश्रयः। तस्मादिहोपधानमात्रं विधीयते॥ अष्टमाधिकरणमा॰ ॥

34

राम

पर्यग्निकृतं पात्नीवतमुत्सृज्यत इत्यसौ॥ यागो गुणो वा यागः स्यादन्वयाव्यवधानतः॥ प्रत्यभि
ज्ञातमालभ्यमनूद्योत्सर्गविधिः॥ गुणः पर्यग्निकृत्वाख्यं वत्तछ रनिवृत्तये॥ न दुष्टापदि संख्या
त्रचोदकात्प्राग्विधौ सति॥ पर्यग्निकरणं त्वांगरीतिः कृष्णोपकारतः॥ त्वाष्ट्रं पात्नीवतमाल
भेतेति प्रकृत्येदमाम्नातं पर्यग्निकृतं पात्नीवतमुत्सृजंतीति तत्र पर्यग्निकृतत्वेन संस्कृतप
शुद्रव्यस्य पात्नीवत्त्वेन पात्नीवन्नामकदेवतासंबंधस्य च प्रतीयमानत्वादयं यागविधिः॥
एवं सति पर्यग्निकृतपात्नीवत्त्वयोरव्यवहितान्वयो लभ्यते। सिद्धांती तु पर्यग्निकृतमुत्सृजंती
त्यन्वयं वांछंति। तदा व्यवहितान्वयो दुर्वारः। तस्माद्वायव्यपशुवद्यागविधिरिति प्राप्ते ब्रूमः
अनारभ्याधीतत्वान्नास्ति वायव्ये प्रकृतप्रत्यभिज्ञा इह त्वालभ्यतेन प्रकृतः पशुः पात्नीवत्त्व
ेन प्रत्यभिज्ञायते। समनन्तरपर्यग्निकृतत्वेनान्वितेनोत्सृजंतीत्याख्यातेन पर्यग्निकरणाख्या

गुणो विधीयते। नच प्रकृतिगतस्य पर्यग्निकरणस्य विकृतौ चोदकेन प्राप्तत्वादनर्थकोयं विधिरिति
वाच्यं। उपरितनांगाननुवृत्तौ विधिप्रयोजनत्वात्। नन्वेवं सति परिसंख्यास्यात्स्याच्च दोषत्रयदु
ष्टस्वार्थत्यागो न्यायार्थस्वीकारः प्राप्तबाधश्चेति त्रयो दोषाः पर्यग्निकरणवाक्ये स्वार्थविधित्वस्यत्य
ता। अन्यार्थो निषेधः स्वीक्रियेत। चोदकप्राप्तान्युपरितनांगानि वाध्येरन्। मैवं। पर्यग्निकरणो
त्तरभाविन्यंगानि नानुष्ठेयानि इत्येतस्याः परिसंख्याया अनंगीकारात्। कथं तर्हि तन्निवृत्ति
रार्थिकीति ब्रूमः। चोदकप्रवृत्तेः प्रागेवायं विधिः प्रवर्त्तते प्रत्यक्षोपदेशस्य शीघ्रबुद्धि
जनकतया कल्प्यातिदेशात् प्रबलत्वाच्च धामसत्सुपदिष्टेरेवांगैर्निराकांक्षायां विकृतौ चोदक
स्याप्रवृत्त्यैवोपरितनान्यंगानि न प्रवर्थन्ते। न चानेन न्यायेन पर्यग्निकरणात् प्राचीनानामप्यप्रा
प्तिरिति वाच्यं। विधीयमानस्य पर्यग्निकरणस्यानुत्तने त्वे सत्युपकारकल्पनापत्त्या प्रकृतौ य

राम

तत्कृतोपकारं पर्यग्निकरणं तदवस्थापन्नस्यैवात्र विधेयत्वात् प्रकृतौ च प्राचीनांगानंतर
भाविन एवोपकारः कृत इत्यत्रापि तादृशस्यैव विधानात् पर्यग्निकरणं तांगरीतिः सिध्यति।
एवं च सत्युत्सृजंतीत्याख्यातेन यथोक्त पर्यग्निकरणविधावर्थात् सिद्ध उपरितनांगोत्सर्गो
धातुनानूद्यते। तदेव मुख्यगुणविधिः। नवमाधिकरणमाः॥ यददाभ्यं गृहीत्वेति गृह्णात्यं
शुमिति द्वयं॥ तद्यागो वा गुणो यागः स्याददाभ्यंशुनामतः॥ ग्रहयोरेव नाम स्यादानं तेयो
द्विधिरूलयोः॥ गुणो तस्तस्य वाक्येन ज्योतिष्टोमाभिगामिता॥ अनारभ्य श्रूयते। एष वै हविषा
हविर्यजति यः अदाभ्यं गृहीत्वा सोमाय यजत इति परावरा एतस्यायुः प्राण एति योंऽशुं गृ
ह्णातीति च तत्रादाभ्यशब्दस्य ज्योतिरादिवदपूर्वनामत्वात्तन्नामको यागो यजत इत्याख्याते
न विधीयते। अंशुमित्यत्र यजतेरश्रवणेपि नामविशेषवलादेवापूर्वयागविधिः। न चात्र

द्रव्यदेवतयोरभावः। ग्रहणलिंगेन ज्योतिष्टोमविकृतित्वावगतौ तदीयविध्यंतातिदेशेन तल्लि
ङ्गेरिति प्राप्ते ब्रूमः। भवतदाभ्यांशुशब्दयोर्नामत्वं तेन च नामनीयग्रहयोरिव स्यातां न तु यागयोः। गृही
तेति शब्दस्यानंतरमेव पाठात्। यजिस्तु व्यवहितः। तादृशोपि यजिरंशुवाक्ये नास्ति। तस्माद्ग्रहयो
रेवात्र विधिः। ग्रहणं च ज्योतिष्टोमगं। तस्य सोमरसस्य संस्काररूपो गुणः। ऐंद्रवायव्यादिग्रहण
समानत्वात्। यद्यप्यत्र न प्रकृतो ज्योतिष्टोमः। तथापि तत्संबंधिग्रहणद्वारा वाक्याज्ज्योतिष्टोम
गामित्वं। अत एव सोमायादाभ्यं गृह्णातीति निर्दिश्यते। अथवा तैत्तिरीयाणां षष्ठकांडे षष्ठे प्रपाठ
के प्राकरणिकं विनियोजकवाक्यं द्रष्टव्यं। तस्माज्ज्योतिष्टोमे गुणविधिः॥ दशमाधिकरणमा०॥
अग्निं चिनुत इत्यत्र यागो वा संस्कृतिर्यजिः॥ लिंगेन याग नामत्वोद्यजिना चानुवादतः॥ रूढ्याद्र
व्यस्य नामैतद्गृहाधानवच्चितिः॥ संस्कृतिः संस्कृते वह्नावग्निष्टोमो विधीयते॥ य एवं विद्वान

ग्निं चिनुत इत्येवं विधाय श्रूयते अथातोऽग्निमग्निष्टोमेनानुयजतीति तमुक्थेन तं षोडशिनातमति
रात्रेणेत्यादि। अत्राग्निशब्दो यागवाची। स्तोत्रशस्त्रादेः अनुलिंगस्य श्रूयमाणत्वात् तच्चलिंगमेवं श्रूय
ते अग्नेः स्तोत्रमग्नेः शस्त्रमिति षडुपसदोऽग्नेश्चित्यस्य भवन्तीति च यदि लिंगं प्रापकापेक्षं तर्हि यज्ञे
नातदनुवादः प्रापकोऽस्तु। अग्निमग्निष्टोमेनानुयजतीत्येतस्मिन् वाक्ये अग्निं यजतीति यजिसामा
नाधिकरण्यादपांशुयजतीतिवद्यागनामत्वं। अथोच्येत। अनुशब्दस्याग्निशब्देनानुपाध्यन्न्योऽग्नि
ष्टोमस्येति तथाप्यग्नेः पुरोयजने सत्यग्निष्टोमस्यानुयजनं संभवति देवदत्तमनुगच्छति यज्ञदत्त इत्य
त्र देवदत्ते पुरोगमनदर्शनात् तस्मादग्निं चिनुत इत्यत्राग्निनामको याग आख्यातेन विधीयते। चिनो
तिस्त्विष्टकाभिरग्निं चिनुत इति वाक्यप्राप्तस्य चयनस्य सोमयागविकृतित्वप्राप्तस्य यह समुदाय
स्यैवानुवाद इति प्राप्ते ब्रूमः। अग्निशब्दो रूढ्या वह्निद्रव्यमाचष्टे रूढिश्च क्लृप्ता पालिंगादिकल्प्या याग
वाचित्वात्तु कल्पनीयमिति न यागनामत्वं। नचात्र यागरूपमस्ति द्रव्यदेवतयोरसिद्धेः अतोऽग्निमादधीतेत्युक्तो।

37

धानवदग्निं चिनुत इत्युक्तं चयनमग्निद्रव्यसंस्कारः। न च संस्कृतस्य विनियोगाभावः। अग्निमग्निष्टोमे
न यजत इत्यादिवाक्यैरग्निष्टोमादौ विनियोगात्तस्मात्संस्कारविधिः॥ एकादशाधिकरणम्॥ मा
सं जुहोत्यग्निहोत्रं गुणोऽन्यत्कर्म वा गुणः॥ अनूद्य कर्म मासाख्यो गुणोऽप्राप्तो विधीयते॥ उपसद्भिश्च
रित्वेति नित्येतासामसंभवात्॥ अनेकस्याविधेश्चान्यत्कर्मप्रकरणांतरात्॥ कुंडपायिनामयने
श्रूयते॥ मासमग्निहोत्रं जुहोति। मासं दर्शपूर्णमासाभ्यां यजेतेति। अत्र प्राप्तं नित्याग्निहोत्रमनूद्य मा
सलक्षणो गुणोऽप्राप्तत्वाद्विधीयत इति चेन्मैवं॥ किं मास एव विधीयते उतोपसद्भिश्चरित्वेत्युक्ता उपस
सदोऽपि। नाद्यः। उपसदामपि नित्याग्निहोत्रप्राप्तिरहितानां तन्मते विधातव्यत्वात्। न द्वितीयः। एकक
र्मण्यनेकगुणविधौ वाक्यभेदापत्तेः॥ ननु माभूत्तर्हि गुणविधिः। कर्मांतरत्वे किं प्रमाणमिति चेत्। प्रक
रणांतरमिति ब्रूमः। न ह्येतन्नित्याग्निहोत्रस्य प्रकरणं। असंनिहितत्वात्। अयनस्यैतत्प्रकरणं॥
अयनमारभ्याधीतत्वात्। नाहि नित्याग्निहोत्रे गुणविधिः शंकेति चेन्न। प्रकरणस्यासमर्पकत्वेऽपि अग्नि

राम

होत्रशब्देनैतत्समर्पणादेषाशंका भवति॥ सा च वाक्यभेदापत्त्या निराकृता। तथा सति स्वतःसिद्धं प्र
करणभेदं निराकृत्य प्रकरणैक्यापादनेन गुणं विधापयितुं प्रवृत्तस्याग्निहोत्रशब्दस्य शक्तो निराक्र
यां तदेवस्थः प्रकरणभेदो नित्याग्निहोत्रादिकं कर्म भिनत्ति अग्निहोत्रशब्दो धर्मातिदेशार्थ इति सम
मेव वक्ष्यते। नन्वपसन्मासाभ्यां विशिष्टमिदं कर्म विधीयते न ततो वाजिनन्यायेन गुणभेदात्कर्मभेदो न
प्रकरणभेदादिति चेन्न। वैषम्यादुपादेयतया विधेयो गुणेन वाजिनं मासस्त्वनुपादेय इत्येकं वैष
म्यं द्रव्यते न रूपांतर्गतं वाजि मासो न तथेत्यपरं वैषम्यं। परमार्थस्त्वत्र प्रथमतरप्रतीतेन प्रकरण
भेदेन सिद्धं कर्मभेदं गुणभेद उपोद्बलयति। ततः प्रकरणांतरमेवात्र भेदहेतुः। उदा० अष्टाकपालमा
ग्नेयं रुक्कामः प्रकृते फलं॥ कर्मान्यता फलभावात्त्वन्यायाप्रवेशानात्तु मानम्भिन्नं प्रकरणं कर्मा
तरमसन्निधेः॥ अनारभ्याधीतमेतद्रूपत्वन्यत्र नमीहते॥ अनारभ्याध्ययते। आग्नेयमष्टाकपालंनि

वैपेद्रुक्कामः इति। रुक्कामस्तेजस्कामः। अत्रेष्टीनां प्रकृतिभूतदर्शपूर्णमासगतमाग्नेययया
गमनूद्य तत्र तेजस्कामरूपं फलं विधीयते। कुतः। वाक्येनाग्नेयफलसंबंधस्य भासमानत्वात् न च
पूर्वोक्तमासाग्निहोत्रन्यायेन कर्मांतरत्वं वैषम्यात्। तत्रायनमारभ्याधीतत्वादस्ति प्रकरणांतर
त्वं इह त्वनारभ्याधीतत्वेन प्रकरणमेव तावन्नास्ति कुतो प्रकरणांतरत्वं। किंच मासोऽनुपादेयः
अग्निहोत्रानुसारेण संपादयितुमशक्यत्वात् फलं तूपादेयं॥ दर्शपौर्णमासिकाग्नेयानुसारेण ते
जसः कामयितुं शक्यत्वात्तस्मात्फलविधिरिति प्राप्ते ब्रूमः। प्रकरणांतरत्वाभावेप्यनारभ्याधीत
त्वादसंनिधिरस्त्येव स एवात्र कर्म भिनत्ति। न्त्वात्र वाजिनन्यायेन कर्मभेदः अष्टाकपाल इत्या
ग्निदेवतात्मनो रूपस्योभयत्रैकविधत्वात्। यदि प्रकरणांतरत्वमप्यसन्निधिकृतमित्यसंनिधि
रेव मासाग्निहोत्रे कर्मभेदहेतुः। तर्हि तस्यैवायं प्रपंचोस्तु। फलं च मासवदनुपादेयं। अन्यथा साध

38

नवद्फलत्वप्रसंगात्। कामनाचविषयेसौंदर्यज्ञानात्स्वतएवोत्पद्यतेनतुविधिश्रवणात्सं
पद्यते॥ यद्यधिकरणयोर्न्यायभेदोयदिवान्यायैकंसर्वथातेजस्कामेष्टिःकर्मांतरंकाम्येष्टि
कांडपठितेष्वेंद्राग्नमेकादशकपालंनिर्वपेत्प्रजाकामइत्यादिष्वयमेवन्यायोद्रष्टव्यः॥ त्र
योदशाधिकरणमाः॥ यजेतसमेपौर्णमास्यांयावज्जीवंतथैतया॥ अन्नाद्यकामइत्यादौक
र्मभेदोयवागुणः॥ विध्युपादानयोरैक्याद्देशादेरनुपात्तितः॥ आवश्यकेकर्मविधौतद्भेदः पु
नरुक्तितः॥ देशादियोगस्याप्राप्तविधिर्नैकतातयोः॥ पुरुषशब्दव्यावृत्तत्वात्पुनरुक्त्यात्व
न्नूद्यते॥ दर्शपूर्णमासाभ्यांयजेतेति। अवेष्टिप्रकरणेफलमाम्नातं॥ एतयान्नाद्यकामंया
जयेदिति॥ आदिशब्देनसंस्कारोगृहीतः॥ सचदर्शपूर्णमासप्रकरणेसमाम्नातः॥ ध्रौवंस्विष्ट
कृतेसमवद्यतीतितत्रदेशकालनिमित्तफलसंस्काराअननुष्ठेयत्वाद्नुपादेयाः॥ अतएवन

39

विधेयाः॥ उपादानविधिशब्दयोः पर्यायत्वात्। ततः कर्मविधिरित्यवश्यमभ्युपेयं। तत्र प्रकर
णिनो दर्शादेः पूर्वविहितस्य वैमिधीकैः पुनर्विधाने समिधो यजतीत्यादिवदभ्यासादेव कर्म
भेद इति प्राप्ते ब्रूमः। देशादीनामविधेयत्वेपि विहितकर्मणा सह तेषां संबंधो विधीयतां॥
स च कर्मवत्पूर्वं न विहित इत्यप्राप्तत्वाद्विधिमर्हति। यदुक्तमुपादानविधिशब्दौ पर्यायाविति
तदसत्। अप्रवृत्तप्रवर्त्तनं विधानं। तच्च पुरुषविषयः शब्दव्यापारः। अननुष्ठितस्यानुष्ठान
मुपादानं। तच्च कर्मविषयः पुरुषव्यापार इति महान्भेदः। योपि दर्शादीनां पुनर्विधिः सोपि देशा
दिसंबंधं विधातुं कर्मानुवाद इति न कर्मभेदमावहति। समिधो यजातिइत्यादौ विधेयगुणांतरा
भावेनानुवादासंभवात्पुनर्विधानं भेदहेतुरिति वैषम्यं॥ चतुर्दशाधिकरणमा॰। दर्शपूर्णमा
सयोः प्रोक्तमाग्नेयः केवलोप्यसौ॥ दर्शे यदिति वा वपाभ्यां कर्मान्यदानुवादगीः॥ अभ्यासोद

दान
३२

न्यकर्मत्वं दर्शेष्टीष्टिः प्रसज्यतां ॥ एकत्वं प्रत्यभिज्ञानादन्त्येंद्राग्नसंस्तुतिः ॥ यदाग्नेयोष्टाकपालो
मावास्यायां च पौर्णमास्यां चाच्युतो भवति इति कालद्वये विहितं यदाग्नेयोष्टाकपालोऽमावास्यायां
भवतीत्येकस्मिन्काले पुनर्विहितं तत्राविशेषपुनःश्रुतिलक्षणेनाभ्यासेन प्रयाजानामिव भे
दः ॥ तथा सत्याग्नेययागस्य दर्शकाले द्विः प्रयोग इति चेन्न । प्रत्यभिज्ञानादाग्नेयस्यैकत्वे सत्ये
ककालवाक्यस्यानुवादकत्वात् न चानुवादो व्यर्थः ॥ विधेयैंद्राग्नस्तुत्यर्थत्वात् । यद्यप्याग्नेयोष्टा
कपालोमावास्यायां भवति तथापि न केवलेनाग्निना साधुर्भवति ॥ इंद्रसहितोग्निः समीचीनत
रः । तस्मादैंद्राग्नः कर्तव्य इति विधेयस्तुतिः । प्रयाजवैषम्यं तत्त्वमेवानुसंधेयं ॥ इति श्रीमाध
वीये जैमिनिन्यायमालाविस्तरे द्वितीयाध्यायस्य तृतीयः पादः ॥ चतुर्थपादस्य प्रथमा
धिकरणमारचयति ॥ यावज्जीवं जुहोतीति धर्मः कर्मणि पुंसि वा ॥ कालत्वात्कर्मधर्मोतः का

म्यएकः प्रयुज्यतां ॥ न कालो जीवनं तेन निमित्तप्रविभागतः ॥ काम्यप्रयोगो भिन्नः स्याद्यावज्जी
वप्रयोगतः ॥ बह्वृचब्राह्मणे श्रूयते ॥ यावज्जीवमग्निहोत्रं जुहोतीति ॥ तत्र यावज्जीवशब्दो म
रणावधिकालपरः । तत्कालसंबंधस्य प्रकृते काम्याग्निहोत्रे पूर्वमप्राप्तत्वाज्जुहोतीत्यनूदिते
कर्मणि विधीयते । तथा सत्यस्य वाक्यस्य नित्यप्रयोगविधायकत्वाभावेन वाक्यांतरविहितः
काम्यप्रयोग एक एवाग्निहोत्रस्य पर्यवस्यति । स च काम्यप्रयोगो भ्यसितव्यः । सकृदनुष्ठान
स्याग्निहोत्रं जुहुयात्स्वर्गकाम इत्यनेनैवासिद्धत्वात् यावज्जीवमित्यस्य कालविधेर्वैयर्थ्यप्र
संगात् तस्मादयं काम्यकर्मणोभ्याससिद्धये कालरूपधर्मविधिरिति प्राप्ते ब्रूमः ॥ यावज्जीव
शब्दो न कालस्य वाचकः किं तु लक्षकः ॥ वाच्यार्थस्तु कस्तत्र जीवनं न च जीवनं कर्मधर्मत्वेन वि
धातुं शक्यं । तस्य पुरुषधर्मत्वात् । तं च पुरुषधर्मं निमित्तीकृत्याग्निहोत्रप्रयोगो विधीयते । न चा

त्र कर्मभेदः॥ तद्वेतन्नो शाखांतरादीनामभावात् नचाभ्यासरूपहेतुः॥ निमित्तविशेषसद्भावेनाविशे
षपुनःश्रुतेरभावादतः प्रयोगभेदः पर्यवस्यति॥ जीवनस्यात्र निमित्तत्वात् सतिनिमित्ते नैमित्तिक
स्यत्यागायोगात्तन्नित्यत्वमर्थसिद्धं॥ नचजीवननैरंतर्येण प्रयोगनैरंतर्यापत्तिः॥ सायंप्रातःका
लयोर्विहितत्वात्। तस्माज्जीवनस्यपुरुषधर्मत्वान्नित्यकाम्यप्रयोगौभिन्नौ॥ द्वितीयाधिकर
णमा॰॥ शाखाभेदात्कर्मभेदोनवा कर्मात्रभिद्यते॥ इष्टं काष्ठकनामादि बहुभेदायकारणं॥ ग्रंथ
वारादिनाद्येतेयुज्यंतेभेदहेतवः॥ रूपादिप्रत्यभिज्ञानादभिन्नंकर्मगम्यते॥ काठककाण्वमाध्यं
दिनतैत्तिरीयादिशाखासु दर्शपूर्णमासाख्यंकर्माम्नातं। तत्र शाखाभेदात्कर्मभिद्यते। कुतः॥ भे
दकारणानांनामभेदादीनां बहुलमुपलंभात्। काठककाण्वादिकोनामभेदः। कारीरीवाक्यान्य
धीयानाः केचिद्धा्विनोभूमौभोजनमाचरंति। शाखांतराध्यायिनो नाचरंतीति धर्मभेदः एकस्यां

शाखायांमधीताइषेत्वेत्यादयोमंत्रापठ्यंते। आशाशाखच्छिदादयः क्रियास्वशाखांतरेप्यधीयंतइ
तिपुनरुक्तिरेवमशक्यत्वादयोभेदहेतवउदाहार्याः॥ नशिष्यानुष्ठानमनुष्ठेयेणसर्वशाखाध्ययनपू
र्वकंकर्मानुष्ठानंकर्तुंशक्यंतस्माच्छाखाभेदेनकर्मभेदइतिप्राप्तेब्रूमः॥ रूपाद्यभेदादेकंकर्मान्ने
योष्टाकपालादियागरूपंयदेकस्यांशाखायांतदेवान्यत्राप्युपलभ्यते। दर्शपूर्णमासाभ्यांयजे
नेतियागरूपःपुरुषव्यापारश्चैकविधः। दर्शपूर्णमासावितिकर्मनामाप्येकं। स्वर्गकामइति
फलसंबंधोप्येकः तस्मादभिन्नंकर्मपूर्वपक्षेहेतवस्त्वन्यथासंगच्छंते। काठकादिकंज्योतिरा
दिवत्कर्मकाठकेनयजेतेत्यश्रवणात्। काठकमधीतइतिप्रयोगाद्ग्रंथनामेत्यवगंतव्यं। भो
जनादिरध्ययनधर्मः पुनरुक्तिरध्येतृभेदान्नदुष्यति। अन्यासुषापिशाखांतरस्योपसंहा
रन्यायेकर्मानुष्ठातुंशक्यते। तस्मादन्यथासिद्धरूपप्रत्यभिज्ञानाच्छाखाभेदेपिकर्मनभिद्यतइति

श्रीमाधवीयेजैमिनीयन्यायमालावृत्तौ
द्वितीयोध्यायःसमाप्तः॥ रामराम रामराम